सप्तदशी

चमू कृष्णशास्त्री



संस्कृतभारती

नवदेहली

CC-0. Nepal Sanskrit University Kathmandu Collection

सप्तदशी

चमू कृष्णशास्त्री

संस्कृतभारती
नवदेहली

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रस्तावना

अत्र उच्यमानाः विषयाः नूतनाः न सन्ति। इतः पूर्वम् अपि बहुषु प्रसङ्गेषु उक्ताः एव। परन्तु केषाञ्चित् मुख्यभूतविषयाणां वारं वारं श्रवणं पठनं मननं च आवश्यकम्। तेन लक्ष्यस्य स्मरणं, कार्यस्य स्पष्टता, प्रेरणायाः वृद्धिः, विश्वासस्य वर्धनं च भवति।

सप्तानां दशकानां पठनेन संस्कृतभारत्याः चिन्तनस्य, अनुभवस्य च सारांशः अवगतः भवेत्। अतः सर्वः अपि संस्कृतज्ञः एतत् पुस्तकं पठेत् इति अस्माकम् अपेक्षा। सप्त अपि विषयाः सप्तसु सत्रेषु चर्चायोग्याः अपि सन्ति। प्रथमम् एते विषयाः संस्कृतज्ञानां परस्परवार्तालापविषयाः भवेयुः, तदनु जीवनकार्यविषयाः भवेयुः। तेन एव एतस्य प्रकाशनस्य सार्थकता।

अत्र पुस्तके केचन विषयाः द्वित्रेषु अध्यायेषु पुनरुक्ताः अभवन्। विषयमहत्त्वंकारणतः सा पुनरुक्तिः अनिवार्या जाता।

डा. रा. देवनाथ-महोदयः, राष्ट्रियसंस्कृतसंस्थानस्य देहली-परिसरस्य प्राचार्यः, अस्य पुस्तकस्य लेखनमनु सम्पूर्णं पठित्वा भाषापरिष्कारं च कृत्वा पुस्तकस्य गुणवृद्ध्यै सूचनाः दत्तवान्। तस्मै अस्माकं धन्यवादाः। सहयोगकर्त्रे श्रीमते राकेशगोस्वामिमहोदयाय, मुद्रकाय ग्राफिक् वर्ल्ड इति संस्थायै च धन्यवादान् अर्पयामः।

एतेषां सप्ततेः बिन्दूनां विचारः, आचारः, प्रचारः इति त्रयः अपि कर्तव्यांशाः वाचकानां जीवनेषु क्रियारूपेण दृश्येरन् इति आशास्महे।

प्रकाशकः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रकाशनम् -
संस्कृतभारती
माता मन्दिर गली, झण्डेवाला,
नई दिल्ली - 110055
दूरभाषा - 011-23517689

© प्रकाशकस्य एव।

मूल्यं - रू. ३०.००

प्रथममुद्रणम् - २००५ - ५०००
द्वितीयमुद्रणम् - २०११ - १०००

मुद्रणम् - ग्राफिक् वर्ल्ड
दरियागंज, देहली-2

ISBN-81-87276-26-6

SAPTADASHI- Essays on important issues of popularising Samskrit.
Publishers- **SAMSKRITA BHARATI**,
Mata Mandir Gali, Jhandewala, New Delhi-110055
Tel.-011-23517689 First Edition -2005
Pages -N+ 48 Price - Rs.30/- Second Edition-2011
Printed at : Graphic World, Darya Ganj, New Delhi-2

CC-0. Nepal Sanskrit Academy, Kathmandu. Collection

१. दश प्रश्नाः

सर्वः अपि जनः, संस्था, सङ्घटनं वा जीवनयात्रायां मध्ये मध्ये आत्मावलोकनम्, आत्मनिरीक्षणं, मूल्याङ्कनं, सिंहावलोकनं वा कुर्यात् इति अपेक्षा अस्ति। 'लक्ष्यानुगुणं, योजनानुगुणं च प्रगतिः जायमाना अस्ति, उत न ?, यदि न्यूनताः सन्ति तर्हि ताः काः ? मध्येमार्गं के परिष्काराः करणीयाः ?' इति चिन्तनं सर्वेण अपि करणीयम्।

संस्कृतप्रचारक्षेत्रस्य कार्यकर्तारः वयं सर्वे सम्भूय संस्कृतस्य विकासाय समग्ररूपेण चिन्तनं कर्तुं पूर्वभाविरूपेण सकृत् आत्मावलोकनं कुर्याम। तच्च आत्मावलोकनं संस्कृतज्ञानां संस्कृतानुरागिणां च मध्ये राष्ट्रियपरिचर्चारूपेण भवेत्। तादृशीं परिचर्चाम् उत्पादयितुं प्रथमं तावत् देशे सर्वत्र संस्कृतज्ञाः स्वयं चिन्तनं कुर्युः, पश्चात् परस्परं चर्चां कुर्युः च। तथा चिन्तनार्थं चर्चार्थं च कश्चन आधारः आवश्यकः। तदर्थं मूलभूताः प्रश्नाः के स्युः इति चिन्तनाय शताधिकप्रश्नानां सङ्ग्रहः कृतः। तेभ्यः प्रश्नेभ्यः मुख्यभूताः दश प्रश्नाः चिताः, ते अत्र अधः दत्ताः सन्ति। एतेषां प्रश्नानाम् उत्तराणि अस्माभिः सुष्ठु अन्विष्टानि चेत् संस्कृतक्षेत्रस्य मूलरोगस्य अवगमनम्, उपचारः च भवेताम्।

मूल्याङ्कनम् इति निमित्तेन अस्माभिः परदूषणं न करणीयम्। परदूषणं नाम समाजदूषणं, सर्वकारदूषणं, राजनीतिदलानां राजनीतिज्ञानां च दूषणं, सर्वकारीयाधिकारिणां दूषणं वा। तद् न करणीयं, यतः तेषां दूषणेन, विमर्शेन वा वयम् आत्मावलोकनं कृतवन्तः न भवामः। आत्मावलोकनाय आत्मकेन्द्रितं चिन्तनं करणीयं, न तु परकेन्द्रितम्। परे जनाः अस्मदधीनाः न भवन्ति। ये अस्मदधीनाः न, तान् केन्द्रीकृत्य चिन्तनं, योजनाः च यदि कुर्मः तर्हि सफलता न्यूना भवेत्। (यथा स्वतन्त्रभारते अद्यावधि जातम्।) तस्मात् अस्माभिः अस्मत्केन्द्रितम् एव, अर्थात् संस्कृतज्ञकेन्द्रितम् एव चिन्तनं करणीयम्। संस्कृतज्ञाः वयम्

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

सप्तदशी

विषयानुक्रमणिका

१. दश प्रश्नाः ५

२. दश कार्याणि १०

३. दश निषेधाः १६

४. दश अवधानकेन्द्राणि २३

५. दश नवसाहित्यप्रकाराः ३३

६. दश आद्यताः ३८

७. दश निर्णायकबिन्दवः ४५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(कदाचित् न, बहुधा एव!) स्वकर्तव्यं विस्मृतं भवति। स्वस्य उत्तरदायित्वस्य उपेक्षा, परित्यागः वा भवति।

अतः आत्मनिन्दाः न करणीयाः, परनिन्दा अपि नैव। स्वकर्तव्यचिन्तनं करणीयं, तदनुकूला एव भाषा प्रयोक्तव्या। किञ्च, रोदनम् अपि करणीयं नास्ति।

सर्वत्र लोकानां कश्चन महान् प्रश्नः भवति- अद्यत्वे संस्कृतस्य प्रासङ्गिकता का? उपयोगिता का? इति। यदि सूक्ष्मरूपेण चिन्त्यते तर्हि प्रश्नः एषः अस्ति यत् संस्कृतज्ञस्य मम भवतः च उपयोगिता/प्रासङ्गिकता का इति, न तु संस्कृतस्य का इति। यदि अद्य मम भवतः च उपयोगिता अस्ति, उपयोगः जायमानः अस्ति तर्हि अस्माकं जीवनम् एव उत्तरम् अदास्यत् खलु? मम भाति, यदि वयम् अद्य अस्माकं जीवनेन प्रासङ्गिकतां प्रतिष्ठापयामः तर्हि संस्कृतं संस्कृतज्ञाः च समाजे पूजास्थाने भवेयुः, नो चेत् वयं संस्कृतज्ञाः श्वः अवकरकण्डोलेषु क्षिप्ताः स्याम।

अस्य लेखस्य अन्ते दत्तानां प्रश्नानाम् उत्तराणि वयम् अन्विष्येम। संस्कृतज्ञमित्रैः सह चर्चां करवाम। प्रश्नानां प्रतिकृतिं कृत्वा वितरेम, पत्रालयमाध्यमेन परिचितेभ्यः संस्कृतज्ञेभ्यः प्रेषयेम। यत्र यत्र शक्यं तत्र तत्र एतान् एव प्रश्नान् स्वीकृत्य एकदिवसीयां, द्विदिवसीयां वा कार्यशालां सङ्गोष्ठीं वा आयोजयेम। महाविद्यालयस्तरे, नगरस्तरे, जनपदस्तरे, राज्यस्तरे वा, कस्मिन्नपि स्तरे सा चर्चागोष्ठी भवितुम् अर्हति। विविधाभिः संस्थाभिः आयोज्यमानासु परिषत्सु आयोज्यमानेषु सम्मेलनेषु च एतेषु विषयेषु शोधपत्राणि उपस्थापयेम। सर्वासु संस्कृतसभासु एकैकं प्रश्नं स्वीकृत्य स्वीयं मतम् उपस्थापयेम। संस्कृतपत्रिकासु, नैमित्तिकस्मरणिकासु, अभिनन्दनग्रन्थेषु च एतद्विषये लेखान् लिखेम। अग्रिमेषु द्वित्रेषु वर्षेषु देशे सर्वत्र सर्वासु वेदिकासु, सर्वेषु संस्कृतकार्यक्रमेषु यदि एते दश प्रश्नाः चिन्तनविषयाः भवेयुः तर्हि कापि राष्ट्रियपरिषदपि भवेत्, नवनीतम् उत्पद्येत च।

CC-0. Nepal Sanskrit Academy. Digitized by eGangotri

अस्मदीयं बलं वर्धयित्वा अस्मदीयकार्यैः परेषु परिवर्तनम् आनयेम खलु। अतः परावलोकनं न, आत्मावलोकनम्।

आत्मावलोकनस्य निमित्तेन आत्मनिन्दनम् अपि न कुर्याम। संस्कृतज्ञाः 'तादृशाः', संस्कृतशिक्षकाः 'एतादृशाः', प्राध्यापकाः 'एवं कुर्वन्ति', पण्डिताः 'तथा कुर्वन्ति' इति एतादृशरूपेण अस्माकं मध्ये अस्मदीयानां परस्परम् आक्षेपकरणं, दूषणम्, आरोपप्रत्यारोपकरणं च न उचितम्। न्यूनतानां विमर्शः अवश्यं करणीयः, परं विमर्शनस्य काचित् योग्या रीतिः भवेत्, प्रयुज्यमाना भाषा सुचिन्तिता स्यात्। यदि तथा न क्रियते तर्हि उद्दिष्टं न सिध्येत्, अन्यः एव कोऽपि विपरिणामः भवेत्। उदाहरणार्थम्- 'संस्कृतज्ञाः एव संस्कृतेन न वदन्ति' इति वाक्यस्य यः आशयः अस्ति तम् एव आशयं 'सर्वैः संस्कृतज्ञैः संस्कृतेन भाषणीयम् इत्यस्य आवश्यकता अस्ति' इति वाक्येन यदि कथयेम तर्हि उचितं भवेत्। यतः प्रथमवाक्यस्य पौनः पुन्येन कथनेन वयमेव अस्मदीयानां विषये घृणाम् उत्पादयामः। कश्चन उपरि मुखं कृत्वा आकाशं प्रति निष्ठीवनं करोति चेत् तद् निष्ठीवितं पुनः तस्य मुखे एव पतेत्, तद्वदेव भवेत् एतदपि। द्वितीयं वाक्यं कर्तव्यं बोधयति। प्रथमं वाक्यम् असन्तोषं निराशतां च जनयति, द्वितीयं वाक्यम् उत्साहं विश्वासं च वर्धयति। अतः अस्माभिः सम्यक् विचिन्त्य भाषाप्रयोगः कर्तव्यः। यस्य अस्ति अनुकूलं चिन्तनं सदैव सः अनुकूलभाषां प्रयुङ्क्ते यस्य च चिन्तनं प्रतिकूलं प्रवर्तते, सः प्रतिकूलभाषया व्यवहरति इतीदं यावत् सत्यं तावद् एव इदमपि सत्यं भवति-वयम् अस्मासु परस्परं अनुकूलभाषणस्य (भावात्मकभाषणस्य) प्रारम्भं कुर्मः तदा तादृशसम्भाषणवातावरणस्य परिणामतः अस्माकं सर्वेषां प्रतिकूलं (अभावात्मकम्) चिन्तनम् अपि कालक्रमेण अनुकूलं (भावात्मकं) भविष्यति' इत्येतदपि।

आत्मनिन्दनेन (संस्कृतज्ञानां निन्दनेन हिन्दूसमाजस्य निन्दनेन वा) आत्महीनभावना एव वर्धिता भवति। परनिन्दनकार्येण कदाचित्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

कर्तुं समर्थाः न भवन्ति। किमर्थम्? किं साहित्यशिक्षणाय च्छात्राणां भाषाकौशलानि सुष्ठु भवेयुः इति मूलभूता आवश्यकता नास्ति? समस्यापरिहारोपायाः के?)

३. किं संस्कृतज्ञः अहं समाजोपयोगी जीवामि? (समाजे अद्य 'मम संस्कृतज्ञस्य' का उपयोगिता? का प्रासङ्गिकता? किम् अहं तथा जीवन् अस्मि?)

४. राष्ट्रविकासे संस्कृतस्य भूमिका का? (राष्ट्रविकासाय अद्य संस्कृतेन का भूमिका निरुह्यमाणा अस्ति? का भूमिका निर्वोढव्या? अस्माकं संस्कृतज्ञानां का भूमिका भवेत्?)

५. संस्कृतशिक्षणे गुणवत्ता कथम् आनेतुं शक्यते? (संस्कृतशिक्षणे गुणवत्तावर्धनं कथम्? तदर्थं का कार्ययोजना भवेत्? तत्र मम भवतः च पात्रं किम्? छात्राणां भाषाप्रयोगकेन्द्रितः अभ्यासक्रमः कथं भवेत्? पाठ्यपुस्तकानां, परीक्षाविधेः च परिवर्तनं कथम्? देशे विद्यमानानां पञ्चलक्षाधिकानां संस्कृतशिक्षकाणां प्रशिक्षणं कथम्?)

६. किं संस्कृतं साध्यम् उत साधनम्? (साध्यं चेत् कथं साधनीयं, साधनं चेत् कथं तद् प्रबलतरं करणीयं, कथं तद् उपयोक्तव्यं च?)

७. संस्कृतानुकूलराष्ट्रमानसनिर्माणाय संस्कृतज्ञानाम् अस्माकं सामूहिककार्ययोजना का भवेत्? तत्र भवतः पात्रं किं/कीदृशं स्यात्?

८. शास्त्राणां स्वयम् अध्ययनाय, इतरेषाम् अध्यापनाय च मत्केन्द्रिता/अस्मत्केन्द्रिता का कार्ययोजना कृता, अथवा करणीया?

९. संस्कृतक्षेत्रस्य प्रमुखाः आवश्यकताः काः? तासाम् आद्यताक्रमः कः?

१०. स्वतन्त्रभारते गतेषु सप्तपञ्चाशद्वर्षेषु अपेक्षितमात्रेण संस्कृतविकासः न जातः चेत् तत्र वयं संस्कृतज्ञाः कुत्र, कीदृशान् दोषान् कृतवन्तः? संस्कृतविकासः कः सम्पादनीयः? सर्वकारैः/उत अस्माभिः संस्कृतज्ञैः? कस्यां परिस्थितौ सर्वकाराः संस्कृतानुकूलकार्याणि कुर्युः?

CC-0. Nepal Rashtriya Pustakalaya, Kathmandu Collection

यः समाजः स्वीयगुणपरम्परां संरक्षन् वर्तमानकालस्य सम्बन्धे प्रतिस्पन्दनं करोति, स्वं परितः जायमानानि परिवर्तनानि अवगच्छन् स्वीयां क्रियां प्रतिक्रियां च अनुक्षणं रूपयति, भविष्यतः कृते आत्मानं सज्जीकरोति, सः एव समाजः जीविष्यति, वर्धिष्यते, जेष्यति च। संस्कृतज्ञसमाजः, वयम् अर्थात् अहं, भवान्, भवती च किं तथा स्मः?

यथा कस्यचित् अपि जनस्य मनः भवति, इच्छाशक्तिः च भवति, तथा कस्यचित् गणस्य, समूहस्य, सङ्घस्य, देशस्य वा सामूहिकं मनः, सामूहिकी इच्छाशक्तिः च भवति। राष्ट्ररूपेण भारतस्य सामूहिकं मनः, सामूहिकी इच्छाशक्तिः च का स्यात् कथं स्यात् इति अनन्तरं चिन्तयामः। परं नवभारतनिर्माणाय प्रथमं वयं संस्कृतज्ञाः ये स्मः अस्माकं संस्कृतज्ञानां सम्भूतं सामूहिकं मनः, जागरिता सामूहिकी इच्छाशक्तिः च असाध्यम् इति भासमानं लक्ष्यम् अपि साध्यम् इति साकारीकृत्य दर्शयेत्। किं पुनः सामान्यलक्ष्याणि? ते दश प्रश्नाः एवं सन्ति-

१. संस्कृतमूलेषु योग-आयुर्वेदादिषु विषयेषु संस्कृतज्ञानां स्वामित्वं कुतः नष्टम्? (अद्य विश्वे संस्कृतशिक्षकाणाम् अपेक्षया योगशिक्षकाणां सङ्ख्या अधिका अस्ति। योग-आयुर्वेद-ज्यौतिष-वास्तुप्रभृतयः विषयाः संस्कृतभाषायाः एव 'प्रदानं' तथापि वृत्तिदृष्ट्या चिन्तयामः चेत् भासते यत् तत्तद्विषयवृत्तिषु संस्कृतज्ञानां स्वामित्वं नष्टम्, असंस्कृतज्ञाः एव ताः वृत्तीः अनुतिष्ठन्ति, ते अवसराः संस्कृतज्ञानां हस्ततः च्युताः इति। एवं किमर्थम्? शिक्षकवृत्तिमात्रं संस्कृतच्छात्राणाम् अक्षिलक्षीभूतम् अस्ति। किमर्थम्?)

२. संस्कृतभाषाध्यापनस्य तदभिव्यक्तेः च समुचितोपायाः के? (जगतीतले भाषाणां शिक्षणसन्दर्भे अनुवादेन भाषापाठनम् (अनुवादविधिः) केवलं संस्कृतभाषाशिक्षणे अवशिष्टम् अस्ति। नान्यस्याः कस्याश्चित् अपि भाषायाः पाठनं। किमर्थम्? संस्कृतस्य स्नातक - स्नातकोत्तोरस्तरपर्यन्तम् अपि अधीत्य ते छात्राः संस्कृतेन अभिव्यक्तिं

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

कर्तुं समर्थाः न भवन्ति। किमर्थम्? किं साहित्यशिक्षणाय च्छात्राणां भाषाकौशलानि सुष्ठु भवेयुः इति मूलभूता आवश्यकता नास्ति? समस्यापरिहारोपायाः के?)

३. किं संस्कृतज्ञः अहं समाजोपयोगी जीवामि? (समाजे अद्य 'मम संस्कृतज्ञस्य' का उपयोगिता? का प्रासङ्गिकता? किम् अहं तथा जीवन् अस्मि?)

४. राष्ट्रविकासे संस्कृतस्य भूमिका का? (राष्ट्रविकासाय अद्य संस्कृतेन का भूमिका निरुह्यमाणा अस्ति? का भूमिका निर्वोढव्या? अस्माकं संस्कृतज्ञानां का भूमिका भवेत्?)

५. संस्कृतशिक्षणे गुणवत्ता कथम् आनेतुं शक्यते? (संस्कृतशिक्षणे गुणवत्तावर्धनं कथम्? तदर्थं का कार्ययोजना भवेत्? तत्र मम भवतः च पात्रं किम्? छात्राणां भाषाप्रयोगकेन्द्रितः अभ्यासक्रमः कथं भवेत्? पाठ्यपुस्तकानां, परीक्षाविधेः च परिवर्तनं कथम्? देशे विद्यमानानां पञ्चलक्षाधिकानां संस्कृतशिक्षकाणां प्रशिक्षणं कथम्?)

६. किं संस्कृतं साध्यम् उत साधनम्? (साध्यं चेत् कथं साधनीयं, साधनं चेत् कथं तद् प्रबलतरं करणीयं, कथं तद् उपयोक्तव्यं च?)

७. संस्कृतानुकूलराष्ट्रमानसनिर्माणाय संस्कृतज्ञानाम् अस्माकं सामूहिककार्ययोजना का भवेत्? तत्र भवतः पात्रं किं/कीदृशं स्यात्?

८. शास्त्राणां स्वयम् अध्ययनाय, इतरेषाम् अध्यापनाय च मत्केन्द्रिता/अस्मत्केन्द्रिता का कार्ययोजना कृता, अथवा करणीया?

९. संस्कृतक्षेत्रस्य प्रमुखाः आवश्यकताः काः? तासाम् आद्यताक्रमः कः?

१०. स्वतन्त्रभारते गतेषु सप्तपञ्चाशद्वर्षेषु अपेक्षितमात्रेण संस्कृतविकासः न जातः चेत् तत्र वयं संस्कृतज्ञाः कुत्र, कीदृशान् दोषान् कृतवन्तः? संस्कृतविकासः कैः साधनीयः? सर्वकारैः/उत अस्माभिः संस्कृतज्ञैः? कस्यां परिस्थितौ सर्वकाराः संस्कृतानुकूलकार्याणि कुर्युः?

CC-0. Nepal Sanskrit Academy. Digitized by Dharmakirti Collection

यः समाजः स्वीयगुणपरम्परां संरक्षन् वर्तमानकालस्य सम्बन्धे प्रतिस्पन्दनं करोति, स्वं परितः जायमानानि परिवर्तनानि अवगच्छन् स्वीयां क्रियां प्रतिक्रियां च अनुक्षणं रूपयति, भविष्यतः कृते आत्मानं सज्जीकरोति, सः एव समाजः जीविष्यति, वर्धिष्यते, जेष्यति च। संस्कृतज्ञसमाजः, वयम् अर्थात् अहं, भवान्, भवती च किं तथा स्मः?

यथा कस्यचित् अपि जनस्य मनः भवति, इच्छाशक्तिः च भवति, तथा कस्यचित् गणस्य, समूहस्य, सङ्घस्य, देशस्य वा सामूहिकं मनः, सामूहिकी इच्छाशक्तिः च भवति। राष्ट्ररूपेण भारतस्य सामूहिकं मनः, सामूहिकी इच्छाशक्तिः च का स्यात् कथं स्यात् इति अनन्तरं चिन्तयामः। परं नवभारतनिर्माणाय प्रथमं वयं संस्कृतज्ञाः ये स्मः अस्माकं संस्कृतज्ञानां सम्भूतं सामूहिकं मनः, जागरिता सामूहिकी इच्छाशक्तिः च असाध्यम् इति भासमानं लक्ष्यम् अपि साध्यम् इति साकारीकृत्य दर्शयेत्। किं पुनः सामान्यलक्ष्याणि? ते दश प्रश्नाः एवं सन्ति-

१. संस्कृतमूलेषु योग-आयुर्वेदादिषु विषयेषु संस्कृतज्ञानां स्वामित्वं कुतः नष्टम्? (अद्य विश्वे संस्कृतशिक्षकाणाम् अपेक्षया योगशिक्षकाणां सङ्ख्या अधिका अस्ति। योग-आयुर्वेद-ज्यौतिष-वास्तुप्रभृतयः विषयाः संस्कृतभाषायाः एव 'प्रदानं' तथापि वृत्तिदृष्ट्या चिन्तयामः चेत् भासते यत् तत्तद्विषयवृत्तिषु संस्कृतज्ञानां स्वामित्वं नष्टम्, असंस्कृतज्ञाः एव ताः वृत्तीः अनुतिष्ठन्ति, ते अवसराः संस्कृतज्ञानां हस्ततः च्युताः इति। एवं किमर्थम्? शिक्षकवृत्तिमात्रं संस्कृतच्छात्राणाम् अक्षिलक्षीभूतम् अस्ति। किमर्थम्?)

२. संस्कृतभाषाध्यापनस्य तदभिव्यक्तेः च समुचितोपायाः के? (जगतीतले भाषाणां शिक्षणसन्दर्भे अनुवादेन भाषापाठनम् (अनुवादविधिः) केवलं संस्कृतभाषाशिक्षणे अवशिष्टम् अस्ति। नान्यस्याः कस्याश्चित् अपि भाषायाः पाठनं। किमर्थम्? संस्कृतस्य स्नातक - स्नातकोत्तोरस्तरपर्यन्तम् अपि अधीत्य ते छात्राः संस्कृतेन अभिव्यक्तिं

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

विचारप्रचाराय, लक्ष्यप्राप्त्यर्थं च उपकरणम् आवश्यकम्। तन्नाम कार्यक्रमः आवश्यकः। यथा संस्कृतस्य भाषितभाषाकरणाय, भाषात्वसम्पादनाय वा सम्भाषणशिबिरनामकः कार्यक्रमः अस्ति, तद्वदेव पठन-लेखनकौशलयोः शिक्षणाय, सम्भाषणशिबिरादीनां द्वारा नवशिक्षितानां प्रगतशिक्षणाय, प्रयुज्यमानसंस्कृतस्य शुद्धतारक्षणाय, भाषास्तररक्षणाय, अखिलभारतीयतारक्षणाय (विकासाय इत्येव वरम्।) समकालिक-साहित्यसर्जनस्य मार्गोद्घाटनाय च उपकरणभूतः कार्यक्रमः भवेत् अद्यतनविषयान् अधिकृत्य सरलगद्यानां लेखनं, प्रकाशनं च। प्रकाशनं भवेत्, न भवेत् अपि। वाचकाः स्युः, न भवेयुः वा। तद्विषये चिन्तनं व्यवस्थां च करिष्यामः, परन्तु कार्यारम्भं तु कुर्याम। अनुवादः, अनुकरणं, सर्जनं चेति लेखकत्वस्थानप्राप्तौ विद्यमानेषु त्रिषु सोपानेषु प्रथमसोपानतः आरम्भं कर्तुं शक्नुमः। अतः प्रत्येकम् अपि संस्कृतज्ञः संस्कृतेन लेखनस्य प्रारम्भं कुर्यात्। प्रतिदिनं लिखेत् च।

२. धनसमर्पणं, धनसङ्ग्रहः च

वयं तन्वा, मनसा, धनेन च राष्ट्रसेवां कुर्मः इति प्रतिजानीमहे। संस्कृतप्रचारकार्याणां कृते धनस्य आवश्यकता तु भवति एव। संस्कृतपोषिताः वयं संस्कृतपोषणम् अपि कुर्याम। येन संस्कृतेन वयं भोजिताः तस्मै संस्कृताय अस्माभिः अपि भोजनं दातव्यम्। तस्मात् संस्कृतप्रचारकार्याय अस्मासु प्रत्येकम् अपि जनेन प्रतिवर्षं स्वयं धनसमर्पणं करणीयम्। अन्येभ्यः दशजनेभ्यः धनं सङ्गृह्य दातव्यम् अपि। समाजाय, पवित्रोद्देशाय च धनयाचनायां सङ्कोचः न करणीयः। (एषा याचना एव नैव, पुण्यम् आचरितुम् अपरस्मै अहम् अवसरं कल्पयन् अस्मि इति चिन्तनीयम्।) आयकरदानं वार्षिकं भवति, वेतनं मासिकं भवति, गृहभाटकं, विद्युद्दूरभाषाद्दीनां धनदानं मासिकं भवति, प्रियाय संस्कृतकार्याय भवतः धनदानं वार्षिकम् उत मासिकम्?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

२. दश कार्याणि

वयं सर्वे संस्कृतानुरागिणः। जीवने संस्कृतं प्रधानतया स्वीकृतवन्तः वयम्। संस्कृतस्य ह्रासं पश्यताम् अस्माकं दुःखं भवति। संस्कृताय किमपि करणीयम् इति मनः इच्छति। तर्हि किं करणीयम्? अत्र सूच्यन्ते दश कार्याणि, येषु प्रत्येकम् अपि कार्यं प्रत्येकं संस्कृतज्ञेन करणीयं कार्यम्। एतेषु दशसु कार्येषु कियन्ति कार्याणि, कियता प्रमाणेन, कियन्तं कालं यावत् कुर्वन्तः भवामः इति एतत् अवलम्ब्य मम, भवतः च संस्कृतप्रीतिः, संस्कृतसेवातत्परता, ध्येयनिष्ठता, संस्कृतविषयिणी प्राथमिकता च परीक्षिताः भवेयुः।

अत्र अदत्तानि अपि बहूनि संस्कृतकार्याणि सन्ति, यानि अस्माभिः क्रियमाणानि सन्ति एव। तानि अपि करणीयानि एव। तेषां करणेन अपि संस्कृतसेवा भवति एव, सा अपि संस्कृतज्ञप्रीतेः अभिव्यक्तिः एव। परं संस्कृतोज्जीवनाय यदि सर्वैः अस्माभिः सम्भूय कश्चन योजनापूर्वकः यत्नः करणीयः स्यात् तर्हि एतेषां दशानां कार्याणाम् आद्यता भवेत् महत्त्वं च भवेत्। विद्यालयेषु महाविद्यालयेषु च पाठनातिरिक्ततया एतानि दश कार्याणि अपि करणीयानि। इतरैः संस्कृतकार्यैः सह, तदतिरिक्ततया एतानि दश करणीयानि। दशसु सर्वेषु अशक्येषु, तेषु कतिचन वा।

१. अद्यतनविषयान् अधिकृत्य संस्कृतेन लेखनम्

भाषायाः श्रवणभाषणकौशलयोः यावत् महत्त्वं तावदेव महत्त्वं भवति पठन-लेखनयोः अपि। सामान्यसम्भाषणाभ्यासानन्तरं स्वस्य भाषाशुद्धताप्राप्त्यर्थं, भाषासौष्ठववर्धनाय च पठनलेखने करणीये। 'संस्कृतेन सम्भाषणम्' इति विषयस्य इदानीं गतिवेगः वर्धमानः अस्ति, देशे सर्वत्र सः विषयः अवगम्यमानः, संस्कृतज्ञैः छात्रैः च गृह्यमाणः च अस्ति। अतः इदानीम् अस्माभिः पठनलेखने प्रतिपादनीये।

CC-0. Nepal Sanskrit University. Digitized by eGangotri Academy, Kathmandu Collection

नाम्ना कार्यं कुर्याम। तस्याः संस्कृतभारत्याः विविधकार्याणां कृते सर्वेण अपि समयः दातव्यः। किं भवतः स्थाने संस्कृतभारत्याः कार्यम् अस्ति? नास्ति चेत् किं प्रारम्भः कर्तुम् इष्यते? कार्ये सहभागः इष्यते? 'आम्' इति उत्तरं चेत् संस्कृतभारत्याः सम्पर्कः क्रियताम्।

६. पाण्डुलिपिग्रन्थसम्पादनम्

बहुलक्षसङ्ख्याकाः अप्रकाशिताः पुरातनपाण्डुलिपिग्रन्थाः तत्र तत्र ग्रन्थालयादिषु पतिताः उपेक्षिताः च सन्ति। एते तदा एव प्रकाशम् आगच्छेयुः यदा एकैकः संस्कृतज्ञः एकैकां मातृकां (पाण्डुलिपिग्रन्थं) स्वीकृत्य तस्याः सम्पादनं कुर्यात्। सर्वकारद्वारा एतत् कार्यं निकटभविष्ये क्रियेत इति न भाति। अतः अस्माभिः एव कर्तव्यबुद्ध्या एतत् कार्यं करणीयम्।

७. पत्रपत्रिकासु लेखनानि पत्राणि च

संस्कृतभाषायाः विषये, वाङ्मयस्य, शास्त्राणां, पाण्डुलिपिग्रन्थानां च विषये, संस्कृते विद्यमानानां विज्ञानादिविषयाणां च सम्बन्धे सामान्यानां जनानां ज्ञानं न्यूनम् अस्ति। अतः स्थानीयेषु वार्तापत्रेषु साप्ताहिकादिपत्रिकासु च भारतीयभाषाभिः लेखनानि, सम्पादकेभ्यः पत्राणि च नियतं लेखनीयानि।

८. संस्कृतमाध्यमेन पाठनाय प्रयत्नाः

प्राथमिकस्तरतः विश्वविद्यालयस्तरपर्यन्तं सर्वेषु स्तरेषु संस्कृतस्य संस्कृतमाध्यमेन पाठनं, परीक्षा च यथा स्यात् तथा प्रयतनीयम्। तदर्थं विविधाः प्रयोगाः करणीयाः। पाठाः निर्मातव्याः। एतस्याः शैक्षिकक्रान्तेः प्रारम्भः शिक्षामन्त्रालये, पाठ्यपुस्तकपरिषदि कार्यालये वा न भवेत्, अपि तु एकैकस्यापि संस्कृतशिक्षकस्य कक्ष्याकक्षे भवेत्। स च प्रयत्नः

CC-0. Nepal Sanskrit Academy. Kathmandu. Digital Collection

३. नियताध्ययनं शास्त्राध्ययनं च

सामान्यतः सर्वः अपि महाविद्यालयीयम् अध्ययनं समाप्य पदवीं प्राप्नोति चेत् पश्चात् तस्य अध्ययनं विरलतमम् एव दृश्यते। पाठ्यक्रमेषु अपि अधिकतया अनूदितभागस्य पठनमेव भवति, न तु संस्कृतभागस्य पठनम्। तस्मात् सर्वः अपि स्वस्य संस्कृतभाषास्तरस्य वर्धनाय संस्कृतकाव्यानां वाङ्मयस्य च नियतम् अध्ययनं कुर्यात्। वैदुष्यपरम्परा, शास्त्रपरम्परा च हीयमाना अस्ति इति कारणतः सर्वः अपि प्रतिदिनं शास्त्रावलोकनं कुर्यात्, एकैकं शास्त्रग्रन्थं स्वीकृत्य अध्ययनं कुर्यात् च।

४. निःशुल्काध्यापनम्

विद्यालयमहाविद्यालयपाठेतरसमये तत्रैव, गृहे, मन्दिरे वा सर्वेण अपि सम्भाषणपाठः, भाषापाठः, व्याकरणपाठः, काव्यपाठः, . ग्शास्त्रपाठः कस्यचिदपि संस्कृतग्रन्थस्य पाठः, संस्कृतस्तोत्रपाठः इत्यादिषु यत्किञ्चित् अध्यापनं निःशुल्करूपेण करणीयम्। सः एव संस्कृतज्ञानयज्ञः। सः यज्ञः संस्कृतस्य सञ्जीवनी भवेत्। तादृशं निःशुल्ककार्यम् एव संस्कृतज्ञेषु ध्येयवादं, समर्पणं, सार्थक्यभावं, भावैक्यं, पौरुषं च समुत्पादयेत्। तेन तपसा एव संस्कृतोन्नतिः साध्या। सा एव सर्वश्रेष्ठा संस्कृतसेवा।

५. संस्कृतभारत्याः कार्याणां कृते समयदानम्

संस्कृतप्रचारकार्येषु अग्रेसरी, सर्वेषु राज्येषु सर्वेषु जनपदेषु च आरब्धकार्या संस्कृतभारती सर्वेषां संस्कृतानुरागिणाम् अस्माकं प्रतिनिधिभूता। अस्माभिः सर्वैः सम्भूय कार्यं करणीयम् इत्यतः वयं भाविनि काले संस्कृतभारत्याः नाम्ना कार्यं कुर्याम। एकैकः अपि संस्कृतज्ञः स्वीयाम् एव काञ्चित् संस्कृतप्रचारपरिषदं यदि आरभेत तर्हि प्रतिनगरं दश परिषदः भवेयुः। ताः संस्थाभिनिवेशेन परस्परं कलहपराः सत्यः पुनः संस्कृतकार्यं किमपि साधयितुं न शक्नुयुः। अतः संस्कृतभारत्या

CC-0. Nepal Sanskrit Academy, Kathmandu. Digitized by eGangotri

किञ्च संस्कृतोज्जीवनाय, राष्ट्रोज्जीवनाय, विश्वकल्याणाय च एतानि दश कार्याणि विहाय 'नान्यः पन्थाः विद्यते अयनाय'।

सर्वस्यापि समाजस्य शक्तिः का इति पृष्टे सति वक्तुं शक्यते तस्य समाजस्य १. सर्वेषां समान-स्वप्न-आकाङ्क्षाः २. सम्भूय कार्यकरणशक्तिः ३. धर्मप्रवणता ४. अपेक्षानुगुणं वेगेन परिवर्तनक्षमता ५. सङ्घ्याबलं च इति। संस्कृतज्ञानाम् अस्माकं शक्तिः वर्धनीया चेत् उपरि निर्दिष्टानि दश कार्याणि अग्रिमेषु दशसु वर्षेषु देशे सर्वस्य अपि संस्कृतज्ञस्य दिनचर्यायाः भागाः भवेयुः। एतत् किञ्चिदान्दोलनरूपं प्राप्नुयात्। स्थाने स्थाने संस्कृतज्ञानां मध्ये एतद्विषये चर्चा भवेत् च।

क्रियमाणानि एतानि दश कार्याणि संस्कृतज्ञानाम् अस्माकं सामूहिकसक्रियतायाः द्योतकानि। क्रियमाणम् एकम् अपि कार्यं वयं संस्कृतज्ञरूपेण जीवन्तः स्मः इत्यस्य लक्षणम्।

सा निःशेषजाड्यापहा सरस्वती संस्कृतसुतान् अस्मान् सर्वान् कार्यैकतत्परान् कुर्यात्। तेन च वयं दशभिः कार्यैः दशसु दिक्षु संस्कृताघोषं श्रावयेम। जयघोषं कुर्याम च।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रत्येकं संस्कृतज्ञेन करणीयः। तत्र कष्टानि बहूनि अवश्यं सन्ति। किं प्राणभयं वीरं सैनिकं युद्धरङ्गात् प्रतिनिवर्तयति?

९. संस्कृताय समयदानाय युवकयुवतीनां प्रेरणम्

सर्वः अपि युवा अधीतसंस्कृतः स्वस्य अध्ययनानन्तरं वृत्तिप्रवेशात् पूर्वं वर्षमेकं, द्वित्राणि वर्षाणि वा संस्कृतप्रचाराय समयसमर्पणं कृत्वा पूर्णकालिकरूपेण कार्यं कुर्यात्। यदा प्रतिवर्षम् एतादृशाः युवानः एतेन प्रकारेण कार्यविस्ताराय विस्तारकाः भविष्यन्ति तदा तेषां यूनां चैतन्यं संस्कृतक्षेत्रे नवचैतन्यनिर्माणं कुर्यात्। अतः एतस्य लेखस्य सर्वः अपि वाचकः, सर्वः अपि संस्कृताध्यापकः च स्वमित्राणि स्वशिष्यान् वा संस्कृतार्थं समयदानाय, संस्कृतभारत्याः विस्तारकाः भवितुं च प्रेरयेत्।

१०. स्वस्य अपत्यानाम् अपि संस्कृतपाठनम्

वयं जगति सर्वान् संस्कृताध्ययनाय प्रेरयामः। किमर्थम् अस्माकं गृहे एव न? स्वस्य पुत्रः पुत्री वा संस्कृते MA, आचार्यकक्ष्यायां वा पठितुं न शक्नुयात् कदाचित्। ME, MCA, MBA, MBBS वा पठेत्। तथापि चिन्ता नास्ति। परं न्यूनातिन्यूनं तं गृहे संस्कृतमपि पाठयेम। यदि बाल्याद् न पाठितं, तर्हि इदानीं वा आरम्भं कुर्याम। किं वयम् अस्माकम् अपत्येभ्यः संस्कृतात् ऋते इतोऽपि समीचीनतरम् अन्यत् किमपि दातुं शक्नुयाम? नैव।

यस्मिन् दिने भारतस्य सर्वेषु राज्येषु सर्वासु कक्ष्यासु च संस्कृतमाध्यमेन संस्कृतस्य पाठनं भविष्यति, सर्वेषां संस्कृतशिक्षकाणां गृहाणि संस्कृतगृहाणि भविष्यन्ति, तस्मिन् दिने संस्कृतभाषा इतरभारतीयभाषाणां समकक्षतां प्राप्स्यति। यस्मिन् दिने सर्वे संस्कृतज्ञाः उपरितनानां दशकार्याणां प्रारम्भं करिष्यन्ति तस्मिन् एव दिने संस्कृतं राष्ट्रजीवने विश्वे च नष्टं तद् स्वीयं वैभवं मूर्धन्यस्थानं च पुनः प्राप्स्यति।

CC-0. Nepal Sanskrit Academy, Kathmandu. Collection.

एतद् अपि वयम् अवगच्छेम यत् संस्कृतप्रशंसा, संस्कृतस्य सम्बन्धे जनानां संशयपरिहारः (प्रासङ्गिकतायाः विवरणं वा) इति एतयोः मध्ये भेदः अस्ति इति। द्वितीयम् अपि न्यूनतमं कृत्वा अस्माभिः सर्वैः सम्भूय किं करणीयम् इत्यस्य एव अधिकं विवरणं करणीयम्।

२. व्यक्तिप्रशंसा

पुरतः विद्यमानस्य मुखप्रशंसाकरणं, तदपि निर्लज्जरूपेण, लोके सर्वसामान्यदृश्यम्। बहुभिः स्तुत्यमानजनस्य द्वारा स्वकार्यसाधनाय अधिकतरा प्रशंसा क्रियते अपि। प्रशंसया व्यक्तेः अहङ्कारः वर्धते। अतः व्यक्तेः उपस्थितौ तस्य प्रशंसा न कर्तव्या। अनुपस्थितौ यथेष्टं प्रशंस्यताम्। प्रशंसनीयं च। सम्मुखे प्रशंसा इति एतया परम्परया पुनः 'अहो रूपम् अहो ध्वनिः' इति परस्परप्रशंसापरम्परा वर्धते। प्रशंसया स्वस्य एव प्रशंसाश्रवणस्य इच्छा वर्धते, प्रशंसाऽभावे दुःखम् अपि भवति। अतः विशेषणानां निरर्थप्रयोगाः निवारणीयाः। विशेषणानि तु सन्ति एव। विशेष्याणां निर्माणम् अस्माभिः करणीयम्।

व्यक्तिपूजा उत्तमा न। यतः व्यक्तिः अपरिपूर्णा, स्खलनशीला च। तत्त्वं, सङ्घटनं, गणः च सर्वदा व्यक्तितः उपरि भवेत्। अतः व्यक्तेः अहङ्कारस्य पोषणापेक्षया सङ्घशक्तेः आदर्शस्य आधारस्य वर्धनं श्रेयस्करम्।

किञ्च, अस्य पुष्पस्य अयं सुगन्धः इति वक्तव्यं न भवति। सः जनैः आघ्रातः अनुभूतश्च भवत्येव खलु!

३) स्वप्रशंसा

यदि कश्चन स्वयम् एव स्वस्य डिण्डिमं वादयति, स्वस्य महिमानं वर्णयति, अपृष्टः सन् स्वेन साधितानि प्रपञ्चयति तर्हि मन्तव्यं तस्य स्वप्रशंसा न भवति, किञ्चित् दौर्बल्यम् अस्ति इति। अहङ्कारेण,

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

३. दश निषेधाः

यथा अस्माभिः करणीयानि कार्याणि चिन्त्यन्ते तथा एव अकरणीयानि अपि चर्चनीयानि। यतः अकरणीयस्य करणेन शक्तिहानिः, समयहानिः, अवसरहानिः, कार्यहानिः, जनहानिः, सच्चित्रहानिः, सद्भावहानिः च भवन्ति। योजनापूर्वकं कार्यकरणप्रसङ्गे सफलतायै निर्दुष्टम् अव्यर्थं च पदं निधातव्यम्। अस्माभिः परिणामदर्शिभिः भवितव्यम्। कस्य शब्दस्य वाक्यस्य वा प्रयोगेण, केन प्रकारेण विषयमण्डनेन, कया रीत्या चिन्तनेन, केन व्यवहारेण च कः परिणामः भवति इति अवगन्तव्यम्। यदि अनवगत्य किमपि क्रियेत तर्हि उद्दिष्टं फलं किञ्चित्, प्राप्तम् अन्यदेव किञ्चिद् इति भवेत्। तस्मात् अत्र दशानां निषेधानां उल्लेखः क्रियते।

१) संस्कृतप्रशंसा

संस्कृतकार्यक्रमेषु सामान्यतः संस्कृतशिक्षकाः, संस्कृतच्छात्राः संस्कृतानुरागिणः च एव उपस्थिताः भवन्ति। ते तु संस्कृतस्य महत्तां जानन्ति एव। तेषां सम्मुखे 'भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती' 'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा' इत्यादिरूपेण संस्कृतस्य प्रशंसाकरणेन लाभः नास्ति। यतः ते श्रोतारः सर्वे तं विषयं जानन्ति। ते संस्कृताभिमानिनः, संस्कृतस्य महत्तां जानन्ति इत्येव कारणतः खलु ते कार्यक्रमम् आगच्छन्ति। श्रुतस्य एव भूयः श्रवणेन जामिता अपि भवति। किञ्च कर्तव्यविचारेण विना प्रशंसामात्रेण अकर्मकतायाः एव प्रचारः भवति। क्रियाशून्यं प्रशंसापरकं भाषणं प्रेरणां न ददाति। न केवलं कार्यक्रमेषु, अपि तु सामान्यतया वार्तालापप्रसङ्गे अपि संस्कृतस्य प्रशंसा न आवश्यकी। अद्य आवश्यकता अस्ति प्रत्यक्षतः कार्यस्य। अतः प्रशंसा करणीया चेत् कार्यप्रशंसा करणीया। संस्कृतं सरलम् इति न वदतु, परं सारल्यस्य अनुभवं कारयतु। एवं प्रशंसां विना एव उद्दिष्टं फलं साधयितुं शक्यते। तस्माद् अस्माभिः कार्यक्रमं (कार्यसाधनोपायः वा) परिवर्तनीयम्।

CC-0. Nepal Sanskrit Academy. Digitized by eGangotri

५) आत्मदूषणम् (संस्कृतज्ञदूषणम्)

संस्कृतज्ञान् अस्मान् वयम् एव दूषयामः चेत् तद् आत्मदूषणं भवति। संस्कृतज्ञानां स्वयं बहव्यः न्यूनताः भवितुम् अर्हन्ति। तथा तु समग्रे देशे सर्वेषां लोकानां याः न्यूनताः सन्ति, ताः संस्कृतज्ञानाम् अपि भवितुम् अर्हन्ति, अन्यक्षेत्रेषु यथा, तथा संस्कृतक्षेत्रे अपि भवेयुः। परं तदर्थं संस्कृतज्ञानां दूषणं वयमेव कुर्मः चेत् गृहस्य न्यूनतां गृहसदस्यः एव प्रचारयति इति यथा तद्वद् भवति। अस्माकं मध्ये अपि कथनस्य आवश्यकता नास्ति, यतः सर्वे विषयं जानन्ति। बहुधा आत्मनिन्दनेन क्रमशः आत्महीनभावना वर्धते।

संस्कृतज्ञाः 'तादृशाः, एतादृशाः' इति दूषणस्य स्थाने अस्माभिः सर्वैः किं करणीयं, कथं करणीयं, कार्यक्रमाः के स्युः, योजनायाः दिशा च का भवेत्, स्वस्य उत्तरदायित्वं किम् इत्यादिरूपेण क्रियमाणया चर्चया अधिकः लाभः भवेत्। अकृतस्य, अक्रियमाणस्य च वर्णनेन खेदः भवति। कृतस्य, क्रियमाणस्य करणीयस्य वा उल्लेखमात्रेण अपि प्रेरणा भवति। वाचः, आचरणस्य च कारणेन अनुकूलपरिस्थितेः निर्माणं भवति।

६. छात्रदूषणम्

संस्कृतशिक्षकैः एव संस्कृतच्छात्राणां दूषणं क्रियते चेत् आहत्य संस्कृतस्य चित्रम् उत्तमं न भवति। यथा अन्यविषयाणां सामान्यच्छात्राः भवेयुः तथा संस्कृतस्य अपि सन्ति। अतः एषा समस्या संस्कृतविशिष्टा काऽपि न। किञ्च अस्माभिः छात्राणां प्रोत्साहकवचनानि एव कथनीयानि, न कदापि निन्दकानि, निरुत्साहकानि वा। किञ्च, अधिकांशप्रसङ्गेषु शिक्षकाः स्वेषां वैफल्यानि छात्रेषु आरोपयन्ति छात्राः अयोग्याः इति उक्त्वा यथा वा कुनर्तकी रङ्गमञ्चं निन्दति। एतद् अनुचितम्। अन्यत्र ते एव वयं शिक्षकाः वदामः 'अमी न सुरूपे वादिनः' इति, कीदृशोऽयं विपर्यासः।

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

आत्महीनभावनया, आत्मविश्वासाभावेन च कश्चन स्वस्यैव प्रशंसायां प्रवर्तते। श्रोतारः अपि बुद्धिमन्तः भवन्ति, ते अपि एषः कीदृशः इति अवगच्छन्ति, ते मूर्खाः न इति वक्ता जानाति चेत् सः निश्चयेन स्वप्रशंसां न करोति। वस्तुतः कश्चन स्वप्रशंसया स्वस्य मूल्यापनयं करोति।

स्वप्रशंसया स्थानमानयोः प्राप्तिः न भवति, अपि तु तपसा, श्रमेण च भवति। स्वप्रशंसकः नायकः न भवेत्, विदूषकः तु अवश्यं भवेत्। गौरवभाक् न, उपहासभाग् भवति। स्वप्रशंसायाः गन्धः, वान्तस्य (वमनेन बहिः आगतस्य) गन्धः च समानौ।

४. समाजदूषणम्

शिक्षणे संस्कृतस्य योग्यं स्थानं न कल्पितम् इति, जनाः संस्कृतं न पठन्ति इति वा यदि अस्माकं खेदः अस्ति, तस्य खेदस्य अभिव्यक्तिसमये समाजस्य दूषणं क्रियते तर्हि तेन संस्कृतस्य किमपि प्रयोजनं न भवति, न वा सर्वे आङ्ग्लां पठन्ति, आङ्ग्लया वदन्ति इति कथनेन। परदूषणं सरलं कार्यम्। सहृदयानां सुशिक्षितानां च पुरतः परनिन्दात्मकवाक्यानि कथ्यन्ते चेत् तानि तेषां सत्पुरुषाणां सन्तोषाय न भवन्ति। तादृशभाषणेन अस्माकं लाघवं भवति। कस्य अपि प्रकारस्य परदूषणं संस्कृतस्य, संस्कृतकार्यस्य, संस्कृतभारत्याः वा श्रेयसे न।

केऽपि संस्कृतपठनाय न आगच्छन्ति इति समस्यायाः सामान्यीकरणम् अपि न उचितम्। जनानां संस्कृतपठने अपि कारणानि भवन्ति, अपठने अपि कारणानि भवन्ति। कश्चन पठन् अस्ति चेत् किमर्थं पठति इति जानातु, तदनुसारं कार्ययोजनां करोतु, संस्कृतकार्यं जनान्दोलनरूपं प्राप्स्यति। कश्चन पठन् नास्ति चेत् किमर्थं न इति अवगच्छतु, तदनुसारम् अस्माकं न्यूनताः निवार्य, योजनां नवीकृत्य, पठितॄणाम् आवश्यकताः प्रपूर्य वा लक्ष्यं साधयतु।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

८) दोषप्रदर्शनम् (भाषायां व्यक्तौ च)

दोषप्रदर्शनं द्विधा। वक्तुः भाषादोषप्रदर्शनं, व्यक्तेः दोषाणां (दौर्बल्यानां) प्रदर्शनम् इति। कश्चन यदा संस्कृतेन वक्तुं यतते तदा तस्य भाषादोषाः प्रदर्श्यन्ते चेत्, तत्रापि सर्वेषां सम्मुखे, तस्य उत्साहः धैर्यं च नश्यतः। दोषप्रदर्शनपरम्पराकारणतः अद्यापि बहूनां संस्कृतेन सम्भाषणस्य धैर्यम् एव नास्ति। तादृशस्य वातावरणस्य परिवर्तनाय, च्छात्रेषु धैर्योत्साहवर्धनाय च च्छात्राणां प्रयत्नस्य प्रशंसा करणीया। छात्रस्य भाषापरिष्कारस्य पठनलेखननियमविवरणादयः अन्ये उपायाः सन्ति।

व्यक्तिदोषप्रदर्शनेन वैमनस्यं, कलहः, मनोभेदाश्च उत्पद्यन्ते। व्यक्तिपरिष्कारः करणीयः चेत् तया सह स्नेहः करणीयः, स्नेहेन वैयक्तिकरूपेण च 'दोषान् रहसि बोधयेत्' इति न्यायेन स्मारणीयं भवति, न तु दोषप्रदर्शनं, दोषोद्घाटनं वा।

९) परस्परं पादाकर्षणम्

संस्कृतविद्यालयेषु, महाविद्यालयेषु, संस्कृतविभागेषु, विश्वविद्यालयेषु, संस्कृतसम्बन्धिनीषु समितिषु संस्थासु परिषत्सु च संस्कृतज्ञाः परस्परं पादाकर्षणं यदि न कुर्युः तर्हि सर्वेऽपि सम्भूय कार्यं कर्तुं शक्नुयुः। परस्परं पङ्क्षेपणं क्रियते चेत् न केवलं तयोः हानिः, अपि तु संस्थायाः, किञ्च अन्ततो गत्वा संस्कृतस्य नष्टं भवति। अतः वयं यत्र यत्र भवामः तत्र सर्वत्र अस्माकं भूमिका का भवेत् इति चिन्तनीयम्। संस्कृतभारत्याः कार्यकर्तुः भूमिका तु समन्वयस्य, संयोजनस्य, सर्वसमावेशकतायाः, सामरस्यस्य च भवेत्। यदि कश्चन इदमिदानीं संस्कृतभारत्या सह संयुक्तः, परम् इतः पूर्वं तेन स्वस्य कार्यस्थाने (गृहे अपि!) तादृशी भूमिका न निरूढा तर्हि संस्कृतभारत्याम् आगमनम् अनु नवा भूमिका निर्वोढव्या। स्व. यमं समसमोद्भवकः न भवेत् अपि तु

CC-0. Nepal Sanskrit Academy Kathmandu Collection

अद्य विश्वे प्रथमक्रमाङ्कस्य धनिकः, कम्प्यूटरक्षेत्रे सर्वमान्यः, मैक्रोसाफ्ट-संस्थायाः स्वामी विद्यालयस्तरे एव अनुत्तीर्णः च्छात्रः आसीत्। एतादृशानि उदाहरणानि नैकसहस्राणि सन्ति। यदि वर्तमानसंस्कृतच्छात्राः 'अमुकप्रकारकाः' इति अस्माभिः कथ्यन्ते तर्हि यदा वयं संस्कृतच्छात्राः आस्म तदा वयं 'किम्प्रप्रकारकाः' आस्म? इति प्रश्नः उदेति। तस्मात् मा दूषय, मा दूषय, मा दूषय संस्कृतस्य भविष्यनिर्मातॄन्।

७) अभावचिन्तनम्

युधिष्ठिरः सर्वेषु उत्तमान् एव गुणान् दृष्टवान्, कस्मिन् अपि एकाम् अपि न्यूनतां द्रष्टुं न शक्तवान्, कौरवः सर्वेषु अपि न्यूनताः एव दृष्टवान् न कस्मिन्नपि एकम् अपि गुणम् इति महाभारतकथां वयं जानीमः। एतेन प्रकारेण प्रकृतिद्वयस्य मानवाः भवन्ति, अथवा कस्मिन्नपि मानवे एतादृशं गुणद्वयं भवति। गृहसंस्कारबलात्, सहवासदोषात्, परिस्थितिवशात् शिक्षाकारणाद् वा भावात्मकचिन्तनम् अभावात्मकचिन्तनम् इति द्वयोः अन्यतरः गुणः वर्तमानः भवति। संस्कृतोत्कर्षकाङ्क्षिभिः अस्माभिः भावचिन्तनम् एव करणीयम्। भावचिन्तनेन अर्थात् विद्यमानस्य स्मरणेन कथनेन च उत्साहः विश्वासः च वर्धेते। अभावः सर्वैः ज्ञातः एव, तस्य पुनः कथनेन कोऽपि लाभः नास्ति, अपि तु हानिः एव, यथा अधिकच्छात्राः न सन्तीति, वृत्त्यवसराः न्यूनाः इति वा प्रचारेण सर्वत्र निराशतायाः एव प्रचारः भवति। एकः रोदनस्य प्रारम्भं करोति चेत् सर्वेऽपि पुनः रोदनम् एव कुर्वन्ति। तस्मात् भावाः, विद्यमानाः प्रेरणादायकाः अंशाः एव सर्वत्र कीर्तनीयाः। अस्माकं चिन्तनं यदि भावात्मकं भवति तर्हि वदनम् अपि भावात्मकम् एव भवति। भावभाषणम् इत्येषा अद्य संस्कृतक्षेत्रस्य समयस्य आवश्यकता।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

४. दश अवधानकेन्द्राणि

सामान्यतः वयं किञ्चित् कार्यं दीर्घकालं यावत् कुर्वन्तः भवामः चेत् तस्मिन् कार्ये काचित् यान्त्रिकता आयाति। यदि मध्ये मध्ये आत्मावलोकनं, निरीक्षणं, मूल्याङ्कनं वा क्रियते तर्हि नवीनाः विचाराः, नूतनाः मार्गाः उपायाः च स्फुरन्ति, न्यूनताः निवारिताः भवन्ति, दोषाः परिष्कृताः भवन्ति च।

तथा अवलोकने कृते सति संस्कृतजगति अधोनिर्दिष्टानि दश अवधानकेन्द्राणि दृग्गोचराणि भवन्ति। अर्थात् इदानीं यत्र अस्माकं संस्कृतज्ञानाम् अवधानम् अस्ति तदपेक्षया अन्यत्र अस्माकम् अवधानं केन्द्रीकृतं भवति चेत् संस्कृतस्य अधिकं हितं भवेत् इति ज्ञायते। वर्तमानम् अवधानकेन्द्रं त्यक्तव्यं, निरुपयोगि इति आशयः न। तुलनायां कृतायां, सामयिकावश्यकतासु चिन्तितासु सतीषु अवधानकेन्द्रपरिवर्तनं योग्यम् इति ज्ञायते इत्यर्थः।

१) सर्वकारः न, समाजः

स्वातन्त्र्यानन्तरम् अद्यावधि अस्माकं सर्वेषां संस्कृतानुरागिणाम् अवधानं सर्वकारकेन्द्रितं वर्तते। संस्कृतविकासाय सर्वकाराः किमपि कुर्युः इति अपेक्षाः, अभियाचनाः च कुर्वन्तः स्मः। परं न किमपि महत् साधितम्। कोऽपि सर्वकारः सामान्यतया द्वयोः परिस्थित्योः कमपि उपक्रमं कर्तुं प्रवर्तते। प्रथमा तु समाजे सार्वत्रिकरूपेण काचन महती जनयाचना समुत्पन्ना स्यात्, द्वितीया तु तस्य उपक्रमस्य स्वीकरणेन निर्वाचने मतानि लभ्येरन् इति। संस्कृतदृष्ट्या तु एतद्द्वयम् अपि नास्ति। अतः एव वयं विफलाः अभवाम। इदानीं वा वयं सत्यम् अवगत्य जनाभिमुखाः भवेम। जनमानसपरिवर्तनाय अस्मत्कार्यक्रमान् परिवर्तयेम। योगप्रचारः,

CC-0. Nepal Sanskrit University. Kathmandu. Digitized by eGangotri

परिहारस्य पुरस्कर्ता भवेत्। पादाकर्षणेन पातनं न, हृदयाकर्षणेन आलिङ्गनं करणीयम्।

१०) सङ्कुचितवादाः

संस्कृतविकासकार्याणि कर्तुं विद्यमानाः वयं केचन अपि यदि रूढि-जाति-मत-पन्थ-प्रदेशादिभिः विभिन्नैः सङ्कुचितविचारैः विभक्ताः स्मः तर्हि विकासं कथं साधयेम? तस्मात् सर्वविधाः क्षुल्लकाः हेयाश्च सङ्कुचितवादाः (दुरभिमानाः द्वेषाः वा) त्याज्याः। संस्कृतभक्ताः वयम् अविभक्ताः सन्तः कार्यं कुर्याम। समाजः फलसदृशः। तस्य फलस्य अन्तः विद्यमानं बीजं हि संस्कृतम्। फले सङ्कुचितवादरूपिणः नाशकारिणः कीटाः उत्पन्नाः स्युः, परं ते कीटाः बीजे यथा न प्रविशेयुः तथा जागरूकता रक्षणीया।

एते दश निषेधाः मुख्यभूताः। चिकित्सायाः प्रसङ्गे पथ्यं यथा कथ्यते तथा क्वचित् अपथ्यं वर्ज्यम् अपि कथ्यते। तथा सर्वथा वर्ज्यानि अत्र उक्तानि। समग्रे देशे एकैकेन अपि संस्कृतानुरागिणा एते पालनीयाः। तदा एव रोगोपशमनं शीघ्रं भविष्यति।

एतेषां पालनेन संस्कृतानुकूलवायुमण्डलं, विकासानुकूलपरिवेषः च निर्मिते भविष्यतः। अस्माकं सर्वेषां वाक्षु कृतिषु च एकरूपता, एकाग्रता च भविष्यति। येन लक्ष्यसिद्धौ साहाय्यं भवेत्।

अन्ते च कश्चन चिन्तनबिन्दुः - 'मयि परिवर्तने जाते देशे परिवर्तनं भवेत्।'

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्रष्टुं वयं शताधिकवर्षेभ्यः शिक्षिताः सन्तः तथा आकुञ्चितमानसाः जाताः इति, तेन च भिन्नप्रकारेण चिन्तयितुं न शक्नुमः इति मूलं कारणं वा?

संस्कृतपठनानन्तरं कश्चन किमर्थं शिक्षकः भवति? उपजीविकार्थम् एव। (यदि उपजीविकार्थं न, ज्ञानाय ज्ञानदानाय च इति अभविष्यत् तर्हि सर्वः अपि उपाधिप्राप्तेः अनन्तरम् अपि नियतरूपेण अध्ययनम् अकरिष्यत्!) उपजीविकायै अन्ये अपि शतं मार्गाः सन्ति। वाणिज्यं, स्वोद्योगः, कृषिः, गोपालनं, 'एजेन्सि' इत्येवं रूपेण सहस्रम् उपायाः सन्ति। परन्तु तदर्थं धैर्यं, साहसं, बुद्धिः, पराक्रमः च आवश्यकाः। परिश्रमः कर्तव्यः भवति। उद्यमशीलता आवश्यकी भवति।

यदि वयं सर्वेषु संस्कृतच्छात्रेषु साहसमनोभावम्, उद्यमभावं च उत्पादयिष्यामः, जीवनस्य सर्वं क्षेत्रं प्रवेष्टुं प्रेरयिष्यामः तर्हि निश्चयेन एव संस्कृतम् अपि सर्वक्षेत्रव्याप्तं भविष्यति। संस्कृतं सीमितपरिधितः बहिः आगच्छेत् दश दिक्षु वर्धेत च। शस्त्रं कीदृशम् इति आधारेण युद्धे जयपराजययोः निश्चयः न भवति, अपितु शस्त्रधारी कीदृशः इत्याधारेण भवति। तथा एव संस्कृतम् उपयोगि उत न इति अद्य प्रश्नः न, संस्कृतज्ञाः कीदृशाः इति एतदाश्रित्य एव संस्कृतस्य भविष्यम् अस्ति।

योगः इति विषयः संस्कृतोपज्ञं तत्प्रज्ञं वा, संस्कृतस्य निधिः सः। परम् अद्य संस्कृतज्ञानां योगशिक्षकवृत्तेः च कोऽपि सम्बन्धः नास्ति, न वा संस्कृतस्य अपि। जगति संस्कृतशिक्षकाणां सङ्ख्यायाः अपेक्षया योगशिक्षकाणां सङ्ख्या अधिका अस्ति। केवलम् अमेरिकादेशे एव गतवर्षे योगनाम्ना वाणिज्यं यद् अभवत् तस्य प्रमाणं २७ बिलियन् डालरस्! (१,३५,००० कोटिरूप्यकाणि!) योग इत्यत्र आसनं प्राणायामः इति विषयद्वयस्य एव विक्रयणं जातम् अस्ति, न अन्येषां विषयाणाम्। योगसदृशाः अन्येऽपि बहवः जीवनोपयोगिनः विषयाः संस्कृते सन्ति। यदि संस्कृतज्ञाः उद्यमशीलाः स्युः तर्हि संस्कृतज्ञाः एव निष्णातवः भवेयुः।

CC-0. Nepal Sanskrit Academy. Digitized by eGangotri

वेदान्तप्रचारः इत्यादीनि बहूनि कार्याणि सर्वकारैः न साधितानि। प्रतिग्रामं, प्रतिनगरं, प्रतिविद्यालयं, प्रतिमन्दिरं, प्रतिव्यक्ति च संस्कृतप्रतिष्ठापनकार्यं यत् करणीयम् अस्ति तदर्थं सर्वकारस्य कृपा नावश्यकी, संस्कृतज्ञानाम् अस्माकं पौरुषम् अपेक्षितं, समर्पणं परिश्रमः च आवश्यकौ। अस्माभिः समाजे नवप्रवाहः आनेतव्यः। तस्मात् अस्माकम् अवधानकेन्द्रं समाजः भवेत्।

२) शिक्षाक्षेत्रं-विविधक्षेत्राणि

संस्कृतच्छात्रसङ्ख्यावर्धनं, शिक्षानीतौ पाठ्यचर्यायां च संस्कृतस्य स्थानकल्पनं, शैक्षिकस्तरवर्धनम् इत्येतादृशरूपेण शिक्षाक्षेत्रे संस्कृतस्य स्थानरक्षणं केवलं प्रकृतम् अस्माकं चिन्ताविषयः अस्ति। वस्तुतः तु धार्मिकक्षेत्रे, आयुर्वेदक्षेत्रे, योगक्षेत्रे, ज्यौतिषक्षेत्रे, वेदान्तक्षेत्रे इति एवं प्रकारेण बहुषु क्षेत्रेषु संस्कृतं परित्यज्यमानम् अस्ति अथवा संस्कृतस्य प्राथम्यं न्यूनं जायमानम् अस्ति, संस्कृतस्य स्थानं प्रादेशिकभाषाः स्वीकुर्वत्यः सन्ति। सङ्गीत-नाट्य-विज्ञान-शिल्प-गीता-भागवतकथा-प्रवचन-मनोरञ्जन-अर्थशास्त्र-प्रबन्धविज्ञानादिषु बहुषु क्षेत्रेषु संस्कृतस्य महत्तरं पात्रं भवितुम् अर्हति। अतः अस्माभिः शिक्षाक्षेत्रमात्रविषये पूर्वाग्रहवद्भिः अभूत्वा इदानीं विविधक्षेत्रेषु संस्कृतस्य गौरवस्थानप्राप्त्यर्थं, पादौ स्थिरीकर्तुं च अवधानं करणीयम्।

३) शिक्षकवृत्तिः न, उद्यमशीलता

सामान्यतः सर्वः अपि संस्कृतच्छात्रः संस्कृतं पठित्वा संस्कृतशिक्षकः भवेयम् इत्येव चिन्तयति। तस्य गुरवः अपि तस्मै तामेव दृष्टिं यच्छन्ति। यतः सर्वेषां नेत्रयोः पुरतः सा एका एव वृत्तिः अस्ति। अन्याः वृत्तयः न सन्ति इति कारणम् अथवा तामेव एकाम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

५) विषयाः न, भाषा

प्रकृतं तु संस्कृतशिक्षणे किं पाठनीयम् इति विषये एव अवधानम् अस्ति, न तु कथं पाठनीयम् इति विषये। तथैव पाठ्यभागरूपेण विविधाः ग्रन्थाः ग्रन्थभागाः वा सन्ति, तत्रैव अवधानम् अस्ति। परं भाषाशिक्षणे अर्थात् भाषाकौशलानाम् अभ्यासे आग्रहः नास्ति। अतः एव स्नातकोत्तरशिक्षणस्य अनन्तरम् अपि सः संस्कृतविषये जानाति, न तु संस्कृतम्। भाषा साधु अधिगता चेत् पश्चात् वाङ्मयपठनं तदवगमनं च सरलं सम्पद्यते। भाषा न अधिगता चेत् पश्चात् प्रतिवारं तेन अवगमनाय अनुवादः एव आश्रयणीयः, यथा इदानीं प्रचलति। संस्कृतशिक्षणस्य प्रथमः उद्देशः एव संस्कृतभाषायाः अभ्यासः। अतः अपि भाषाविषये अवधानं करणीयम्।

छात्रेभ्यः भाषाकौशलदानेन वयं तान् स्वतन्त्रान् कुर्मः। भाषासामर्थ्याभावे अद्य तथाकथितसंस्कृतज्ञेषु बहवः पङ्गुतां, मूकतां च अनुभवन्ति। न्यूनातिन्यूनं भाविसंस्कृतज्ञाः एवं मा भवन्तु। तेभ्यः अद्य एव भाषां दद्मः।

केचन वदेयुः संस्कृतविभागे छात्राः एव न सन्ति, संस्कृतमाध्यमं चेत् विद्यमानाः द्वित्राः छात्राः अपि पलायनं कुर्युः इति। तत्र अस्माकं कथनम् अस्ति छात्राः न सन्ति, सङ्ख्या वर्धनीया, पलायनं स्थगनीयम् इत्येतदर्थमेव संस्कृतमाध्यमम् आनयतु इति!

६) साहित्यं न, शास्त्रम्

समग्रे देशे साहित्यच्छात्राणां सङ्ख्या अधिका, शास्त्रच्छात्राणां न्यूना। तत्र कारणे कथ्येते साहित्यपठने सारल्यं तथा च च्छात्राणां शास्त्राध्ययने अनधिकारित्वम् इति। परं तद्विषये अस्माकम् आग्रहाभावः इति तृतीयः अपि कारणम् अस्ति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

४) सङ्ख्या न, स्तरः

संस्कृतस्य छात्रसङ्ख्या क्षीयमाणा अस्ति, सङ्ख्यां वर्धयितुं प्रयत्नः विधेयः एव इति यद्यपि सत्यम् एव अस्ति तथापि तस्याः समस्यायाः भारः अस्माकं शिरसि न तिष्ठेत्। ततोऽपि प्रधानविषयः स्तररक्षणं, स्तरवर्धनं च। शिक्षकाणां स्तरः, पाठ्यपुस्तकानां स्तरः, च्छात्राणां स्तरः इत्याहत्य शिक्षायाः स्तरः वर्धनीयः इति विषयः अस्माभिः अवधातव्यः। वर्तमाने तु शिक्षकाणां दृष्टौ पाठ्यक्रमसमापनं, च्छात्राणां दृष्टौ परीक्षायाम् उत्तीर्णता प्रमाणपत्रप्राप्तिः च केन्द्रबिन्दुः स्यात्। क्वचित् तु कथञ्चित् छात्राः उत्तारणीयाः इति एव यत्नसाध्यः विषयः स्यात्। तथा अपि स्तरवर्धनम् इत्येतद् दृष्टिकेन्द्रं स्यादेव। प्रतिविद्यालयं प्रतिवर्षं केचन वा व्युत्पन्नाः उत्पादनीयाः एव। प्रभूतमात्रया संस्कृतज्ञानरहिताः संस्कृतस्य स्नातक-स्नातकोत्तर-प्रमाणपत्रधारिणः निर्मिताः चेत् तेन किं साधितं भविष्यति? दश जनाः चेद् अपि चिन्ता नास्ति, परं संस्कृतनाम्ना संस्कृतज्ञाः एव निर्मिताः भवन्तु।

संस्कृतज्ञनाम्ना तदनर्हान् एव उत्पादयेम तर्हि यथा वा अयः, सिकताः, वज्रचूर्णम् (Cement) इत्येतेषाम् अपेक्षितपरिमाणेन मिश्रणं विना निर्मितं गृहं, गृहप्रवेशोत्सवात् प्रागेव पतेत्; तथैव संस्कृतभवनस्य अपि गतिः स्यात्।

केन्द्रीयमाध्यमिकशिक्षामण्डल-(बोर्ड्) सम्बद्धविद्यालयेषु सम्प्रेषणविधिना संस्कृतस्य पाठनस्य आरम्भानन्तरं संस्कृतच्छात्रसङ्ख्या अधिका अभवत्, छात्राणाम् उत्साहः अधिकः अभवत्, भाषाज्ञानस्तरः प्रयोगसामर्थ्यं च अधिकम् अभवत् इति अनुभवः। अतः पाठनविधौ परिवर्तनं स्तरवर्धने उपकारकं भवेत्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

च इति। द्वितीयप्रकारः ब्रिटिशकालतः अनुवर्तते। ब्रिटिशानां कृते तु समीक्षाम् अतिरिच्य अन्यः महत्तरः उद्देशः नासीत्। छात्रः संस्कृते प्रगल्भः भवेत् इति अपेक्षा अपि न आसीत्। प्रथमप्रकारः तु एवम् आगतः यत् स्वातन्त्र्यानन्तरं संस्कृतप्रधानाः संस्कृतविद्वांसः चिन्तितवन्तः - संस्कृते विद्यमानानां लक्षशः पाण्डुलिपिग्रन्थानां सम्पादनाय प्रकाशनाय च अयमेव उपायः इति। ग्रन्थसम्पादनाय छात्रस्य भाषासामर्थ्यम् अधिकम् आवश्यकं भवति इति तु सत्यम्। यद्यपि उभयोः प्रकारयोः गुणावगुणाः सन्ति, उभयोः आवश्यकता अपि अस्ति, तथापि चतुर्भिः कारणैः सम्पादनात्मके शोधकार्ये अवधानम् अधिकं भवेत्। १) समीक्षाः बहु अभवन्, अद्यत्वे कीदृशाः निबन्धाः लिख्यमानाः सन्ति इति जानन्तु २) अप्रकाशितग्रन्थानां सम्पादनाय इतोऽपि शतं वर्षाणि कार्यं करणीयं भवेत्, तावत्यः कृतयः सन्ति ३) संस्कृतग्रन्थावलोकनाय, संस्कृतेन निबन्धलेखनाय च अनिवार्यतया छात्रैः संस्कृताभ्यासः करणीयः येन, संस्कृत-पि.एच्.डि. इत्यस्य औचित्यं च सेत्स्यति ४) संस्कृतक्षेत्रे परिवर्तनम् आनेतुं किञ्चित् उपकरणं प्राप्तं भवति। एतान् सर्वान् अंशान् मनसि निधाय विभिन्नविश्वविद्यालयानां संस्कृतपाठ्यक्रमसमितेः सदस्यान् निवेद्य च प्रतिविश्वविद्यालयं नियमपरिवर्तनाय प्रयासः करणीयः।

८) पद्यानि न, गद्यानि

यद्यपि पद्यकाव्यरचना कठिना, श्रेष्ठा च, पद्यानां किञ्चन विशिष्टं महत्त्वम् अस्ति तथाऽपि जगति सर्वासु अपि भाषासु अद्यतना प्रचलिता शैली गद्यात्मिका, वाचकैः सा एव आद्रियते च। अन्वयक्लेशः नास्ति इति कारणतः पाठकः गद्यपठने सारल्यम् अनुभवति। मुद्रणयन्त्राणाम् अभावे तदानीन्तने काले विषयाणां समाप्तौ स्थापनसौकर्याय सर्वेषां विषयाणां ग्रन्थाः श्लोकैः उपनिबद्धाः। अद्य तु कालः परिवृत्तः अस्ति। गद्यानां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एतद् अस्माभिः अवश्यम् अङ्गीक्रियते शास्त्राध्येतॄणां सङ्ख्या न्यूना एव स्थास्यति इति। यथा कला-वाणिज्य-च्छात्राणां तुलनायां विज्ञानच्छात्राणां सङ्ख्या न्यूना इति। अतः चिन्तनीयः अंशः तु अस्माकं प्रयत्नः अधिकः कथं स्यात् इति। कतिचन वर्षाणि यावत् अस्माकम् अवधानं शास्त्रशिक्षणविषये एव अधिकं भविष्यति चेत्, उत्तमान् प्रतिभावतः च च्छात्रान् चित्वा चित्वा तान् शास्त्राध्ययनाय प्रेरयन्तः भवामः चेत् अतिरिक्तविषयरूपेण पाठनम्, अतिरिक्तसमये पाठनं, गृहे पाठनं, विरामकालिककक्ष्याः, विशेषच्छात्रवृत्तयः इत्येवं रूपेण कार्याणि क्रियन्ते चेत् अवश्यमेव परिस्थितिः समीचीनतरा भवेत्।

शास्त्रशिक्षणप्रसङ्गे अपि व्याकरणशिक्षणविषये विशेषतया अवधातव्यम्। व्याकरणशिक्षणे अपि भागद्वयम्- १) सामान्यव्याकरणशिक्षणम् २) व्याकरणशास्त्रशिक्षणम् इति। इदानीं तु व्याकरणमाध्यमेन भाषाशिक्षणं प्रचलति। तद् न योग्यम्। भाषामाध्यमेन व्याकरणं पाठनीयम्। एतद्विषये अवधानं करणीयम्। व्याकरणशास्त्राध्येतॄणां सङ्ख्या, स्तरः च यदि वर्धेत तर्हि आगामि काले भाषाप्रयोगप्रसङ्गे याः समस्याः ये प्रश्नाः वा उद्भवेयुः तेषां परिहारं प्राप्तुं शक्नुयाम। तस्मात् व्याकरणविषये अवधानाधिक्यम् अपेक्षितम्।

७) समीक्षात्मकं न, सम्पादनात्मकम्

समग्रे देशे पि.एच्.डि. उपाधिनिमित्तं शोधकार्यं द्विधा प्रचलति। प्रथमं तु राष्ट्रियसंस्कृतसंस्थाने, अन्येषु केषुचित् संस्कृतविश्वविद्यालयेषु च कश्चित् अप्रकाशितं पाण्डुलिपिग्रन्थं स्वीकृत्य तस्य सम्पादनात्मकं कार्यं, संस्कृतमाध्यमेन निबन्धलेखनम् च इति। द्वितीयं, सामान्येषु विश्वविद्यालयेषु तु कस्यचित् कवेः, कृतेः, कृतीनां, विषयस्य वा समीक्षात्मकम् अध्ययनम्, आङ्ग्लया प्रादेशिक्या वा भाषया निबन्धलेखनं

CC-0. Nepal Sanskrit Academy, Kathmandu. Collection.

स्वजीवने अपि अनुवादकार्यम् एव कृतवन्तः ३) ब्रिटिशभारते (अद्यावधि स्वतन्त्रभारते अपि) संस्कृतग्रन्थानाम् आङ्ग्लानुवादः प्रतिष्ठाविषयः आसीत् ४) अनूदितपुस्तकानाम् एव विक्रयणं भवति स्म (यतः वाचकाः अपि तादृशाः!), अतः अनुवादकाः एव धनं सम्पादयन्ति स्म न तु संस्कृतेन लेखकाः। ५) छात्राः अपि संस्कृतज्ञानस्तरह्रासे जाते भारतीयभाषाभिः अनूदितग्रन्थान् पठित्वा परीक्षालेखनम् आरब्धवन्तः ६) विविध-मत-पन्थ-धर्म-प्रवचनकाराः अनुवादस्य प्रोत्साहनं कृतवन्तः ७) अस्माकं संस्कृतज्ञानाम् अपि संस्कृते विद्यमानान् विषयान् वयं जगतः कृते संस्कृतेन एव प्रदातुं शक्नुयाम इति विश्वासः न आसीत्!

अनुवादस्य समर्थकाः वदन्ति यत् अनुवादानां कारणतः एव अद्य एतावती जनजागर्तिः जाता, संस्कृतविषये रुचिः जनादरः च अभवत् इति। यद्यपि तत्र सत्यम् अस्ति तथापि तस्य सत्यस्य अन्यद् मुखद्वयम् अस्ति- यथा मूलस्य प्रतिकृतेश्च दर्शनेन जायमानयोः परिणामयोः भेदः अस्ति; तथैव मूलस्य अनुवादस्य च आस्वादने अस्ति भेदः। तथा च संस्कृतेन संस्कृतस्य परिचयः इत्यनेन जायमानः सुपरिणामः अनुवादेन नाभवत् इति कश्चन वादः द्रढीयान् वर्तते। यथा इदानीम् आयुर्वेदमहाविद्यालयेषु संस्कृतेन मूलग्रन्थाः पठ्यग्रन्थरूपेण न भवेयुः, अनूदितभागाः एव भवेयुः इति छात्रैः, काभिश्चित् महाविद्यालयप्रबन्धसमितिभिः च अभियाचना क्रियमाणा अस्ति, यथा अनुवादानां पठनम् एव सार्वत्रिकम् अभवत् तथा एषः अनुवादः एव संस्कृतस्य स्थानम् अनाशयत्। अनुवादाः लभ्यन्ते एव, सर्वैः संस्कृतं किमर्थं पठनीयम् इति वादम् अजनयत् च। अतः संस्कृतात् इतरभाषाभिः अनुवादः लाभाय उत हान्यै इति अस्माभिः पुनः चिन्तनीयम्।

परम् अपरं किञ्चित् कार्यम् इदानीम् अवश्यं करणीयम्। इतरभाषाभ्यः संस्कृतेन अनुवादः इति। इतरभाषासु उपलब्धाः अद्यतनाः

CC-0. Nepal Sanskrit Academy. Kathmandu. Digitized by eGangotri

युगम् एतत्। तदनुगुणम् एव रचनाः करिष्यन्ते चेत् संस्कृतं सर्वग्राह्यं भविष्यति। अतः अस्माभिः अस्माकं शक्तिः गद्यनिर्माणे व्ययितव्या।

९) प्रौढं न, सरलम्

पूर्वं कश्चन समयः आसीत् यदा सर्वः संस्कृतकाव्यप्रणेता प्रौढेन, प्रौढतमेन च संस्कृतेन लेखितुं प्रयतते स्म इति यतः भाषाप्रौढिमा एव तदा पाण्डित्यस्य निकषः आसीत्। अद्य कारणद्वयेन अस्माभिः सरलं संस्कृतम् अनिवार्यतया आश्रयणीयं भविष्यति। प्रथमं कारणं-वर्तमाना जागतिकी शैली तु सरल-भाषायाः, प्रवहमानभाषायाः, सर्वजनावगम्यभाषायाः च प्रयोगः इति। द्वितीयं तु संस्कृतस्य प्रसारे प्रथमः महत्तमः च अवरोधः संस्कृतं कठिनम् इति जनभावना। तस्याः भावनायाः मूलोत्पाटनाय दश विंशतिः वा वर्षाणि यावत् सरलतमस्यैव संस्कृतस्य प्रयोगेण अपि अलं न भवेत्! अतः संस्कृतज्ञानाम् अस्माकम् अरुच्यै, जामितायै, उपहासाय च भवति चेदपि चिन्ता नास्ति सरलस्यैव संस्कृतस्य प्रयोगः करणीयः सर्वत्र, सर्वप्रसङ्गेषु, सर्वैः सह च। संस्कृतम् अस्ति चेदेव प्रौढसंस्कृतम् अपि भविष्यति खलु। तस्मात् संस्कृतस्य अस्तित्वरक्षणाय एव सरलम् इति अंशे अवधातव्यम्।

१०) इतरभाषाभिः न, संस्कृतेन अनुवादः

संस्कृतग्रन्थानाम् इतरभाषाभिः (भारतीयभाषाभिः, यूरोपीयभाषाभिः च) अनुवादस्य कार्यं द्विशताधिकवर्षेभ्यः निरन्तरं प्रचलति, अद्यापि प्रचलति! तत्र कारणानि एवं सन्ति- १) यूरोपीयाः संस्कृतकृतीः स्वदेशवासिनः परिचाययितुम् इच्छन्ति स्म २) यूरोपीयानां दृष्ट्या विदेशभाषायाः अध्ययनस्य उद्देशः तद्भाषागतसाहित्यस्य अवगमनं, स्वभाषया अनुवादः च। अतः आङ्ग्लेयाः भारते तेषां विदेशभाषायाः संस्कृतस्य शिक्षणे अनुवादविधिम् आनीतवन्तः, तदनुगुणं शिक्षिताः

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

५. दश नवसाहित्यप्रकाराः

नवशिक्षितानां पठनाय अद्यतनविषयाणाम् अद्यतनशैल्या लिखितानां रोचकपुस्तकानाम् आवश्यकता अस्ति। एतादृशस्य नवसाहित्यस्य निर्माणाय कश्चन विशिष्टः प्रयत्नः करणीयः भवेत्। यद्यपि प्रकाशनविक्रयणे अपि महत्त्वभूते, तयोः चिन्तनं भिन्नप्रकारेण करणीयम् इति कारणतः अत्र तद्विषये न चर्च्यते। ते तु असाध्ये न स्तः। प्रकृतविषयः तु कीदृशस्य साहित्यस्य आवश्यकता अस्ति इति।

१) शास्त्रपरिचायकगद्यानि

वेदान्तादिशास्त्रीयविषयाणां परिचायकानि पुस्तकानि यथा भारतीय-भाषासु उपलभ्यन्ते तथा तादृशानि, सरलसंस्कृतेन लिखितानि, सामान्येन जनेन अपि पठित्वा अवगन्तुं योग्यानि गद्यात्मकानि पुस्तकानि रच्यन्ते चेत् तेषां पठनेन न केवलं तत्त्वप्रचारः ज्ञानप्रसारः च भवति अपि तु पठितॄणां शास्त्रविषयप्रवेशः सरलतया भवति। तेन ते पश्चात् शास्त्रग्रन्थान् रुच्या सरलतया च पठेयुः। किञ्च एतादृशपुस्तकानां पठनेन एव च्छात्राणां विशिष्टरीत्याः भाषायाः अभ्यासः भवति।

२) दीर्घकथाः

आङ्ग्लभाषया 'नावेल्' इति कथ्यमाना, हिन्दीभाषया 'उपन्यासः' इति कथ्यमाना कथा अत्र दीर्घकथा इति उक्ता। इतरभाषासु याः प्रसिद्धाः पुरस्कृताः च दीर्घकथाः सन्ति तासाम् एव संस्कृतेन अनुवादाः क्रियन्ते चेत् संस्कृतेन महान् दीर्घकथासङ्ग्रहः भवेत्। तासां नैरन्तर्येण पठनेन अवश्यमेव छात्राणां भाषाविकासः भविष्यति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ये ये विषयाः सन्ति, वर्तमानाः ये विचाराः सन्ति, ते सर्वे संस्कृतेन अनूदिताः भवेयुः। तेन भाषा, वाङ्मयम् उभे अपि समकालिके भविष्यतः।

अत्र अस्माभिः वर्तमानसमये कुत्र अवधीयमानम् अस्ति, नूतनतया अवधानकेन्द्राणि कानि भवेयुः इति च सूचितम्। परं तस्य अर्थः एवं नास्ति यत् पूर्वतनानि असमीचीनानि, नापेक्षितानि इति वा। वर्तमानपरिस्थितिं, भाविनं कालं च मनसि निधाय रणनीतिरूपेण, कार्यनीतिरूपेण, लक्ष्यसाधनस्य उपायरूपेण अवधानकेन्द्राणि परिवर्तनीयानि, तर्हि तानि कानि भवेयुः इत्येव अत्र आशयः।

अस्माभिः यथाकालं व्यवहर्तव्यं, कालानुवर्तिभिः भवितव्यं च। अतः तदनुगुणं नूतनाः अंशाः योजनीयाः। इतिहासतः पाठाः पठनीयाः। इतरेभ्यः उदाहरणेभ्यः आदर्शाः स्वीकरणीयाः। आवश्यकतानुगुणं नावीन्यं सम्पादनीयम्। अस्मान् परितः किं प्रवर्तते इति अवलोकयद्भिः भवितव्यम्। अस्माकं शक्तिदौर्बल्ययोः मूल्याङ्कनं करणीयम्। उपायापायौ चर्चनीयौ। एतत्सर्वं विचिन्त्य यदि अस्माभिः दृष्टिकेन्द्रं परिवर्तनीयं तर्हि तानि दश अवधानकेन्द्राणि एतानि सन्ति।

प्रत्येकं काठिन्यम् अस्माभिः अवसररूपेण परिवर्तनीयम्। प्रत्येकम् अवसरः बहुफलदायी करणीयः।

यदि वयं निद्रिताः स्मः तर्हि जागरिताः स्याम। वयम् उपविष्टवन्तः स्मः चेत् उत्तिष्ठेम। चलन्तः स्मः चेत् धावेम। कालस्तु निरवधिः, परं सिषाधयिषूणाम् अस्माकं जीवनं तु सावधि। अतः धावन्तः स्मः चेत् अस्माभिः प्रधावनीयम्। अस्माकं लक्ष्यं साधनीयम्।

जगति तमः आवृतम् अस्ति। दीपाः ज्वालनीयाः। किम् अस्मासु एव केचन वर्तिकाः, तैलं च भवेम?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

६) विद्यालयीयानि इतरविषयपुस्तकानि (संस्कृतेन)

संस्कृतस्य संस्कृतमाध्यमेन पाठनम् इति विषयस्य क्रियान्वयनानन्तरम् इतरविषयाणाम् अपि संस्कृतभाषया पाठनस्य प्रयत्नाः करणीयाः। इदानीमेव कर्णाटके महाराष्ट्रे च तादृशाः केचन विद्यालयाः आरब्धाः सन्ति। परन्तु तत्र संस्कृतेन लिखितानां पाठ्यपुस्तकानाम् अभावः अस्ति। केन्द्रसर्वकारेण सेण्ट्रल बोर्ड आफ संस्कृत सेकेण्डरी एजुकेशन् इति यत् प्रस्तावितम् अस्ति तस्य सम्बद्धतासम्बन्धिसूचनासु संस्कृतमाध्यमविद्यालयाः इत्यपि उल्लिखितम् अस्ति। अतः अस्माभिः पुस्तकानि रचितानि चेत् तादृशविद्यालयस्थापनं सुशकं भवति। NCERT पुस्तकानां राज्यपाठ्यक्रमपुस्तकानां वा अनुवादः करणीयः भवेत्।

७) संस्कृताभ्यासाय विशिष्टपुस्तकानि

इदानीम् उपलभ्यमानानि संस्कृतस्य स्वयंशिक्षकाणि पुस्तकानि तु व्याकरणद्वारा भाषाशिक्षणस्य पुस्तकानि सन्ति। भाषायाः माध्यमेन भाषापाठनस्य, भाषाद्वारा व्याकरणपाठनस्य वा पुस्तकानि रचनीयानि। इतरभाषासु तादृशपुस्तकानि सहस्राधिकप्रकारकाणि बहुवर्णैः मुद्रितानि अत्याकर्षकाणि च आपणेषु लभ्यन्ते। संस्कृतस्य अपि तादृशानि भवेयुः। विभिन्नस्तराणां पुस्तकानि, एकैककौशलस्य पाठनस्य पुस्तकानि, भिन्नभिन्नविधिना पाठ्यमानानि पुस्तकानि, नानाविधविषययुक्तानि पुस्तकानि, छात्रावश्यकताधारितपुस्तकानि इत्येवं रीत्या वैविध्यपूर्णानि पुस्तकानि स्रष्टव्यानि।

८) नेतृत्वप्रशिक्षकाणि

वर्तमानैः संस्कृतच्छात्रैः परिणामकारिभिः भवितव्यं, यशस्विभिः, अग्रेसरैः समाजमार्गदर्शकैः राष्ट्रनेतृभिः, विश्वनेतृभिः, नवपथदर्शिभिः च

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

३) लघुकथाः

इतरभाषासु विद्यमानानां लघुकथानाम् अनुवादेन एव संस्कृते सहस्रशः लघुकथाः स्रष्टुं शक्यन्ते। लघुकथानां वाचकानां सङ्ख्या महती भवति। एतासां कथानां पठनेन जनेषु पठनप्रवृत्तिः, तादृशः अभ्यासः पठनगुणः च वर्धते। कथासु सम्भाषणात्मकानि वाक्यानि अपि भवन्ति इति कारणतः पठितॄणां भाषाप्रयोगसमार्थ्यं वर्धिष्यते। लघुकथाभण्डारसर्जनस्य कार्यं धन-श्रम-समय-दृष्ट्या स्वल्पव्ययसाध्यम्। प्रयत्नेन एतादृशेन संस्कृतसाहित्ये नवाध्यायस्यैव प्रारम्भः भवेत्।

४) अद्यतन-विषयाणां पुस्तकानि

विज्ञान - गणित - इतिहास - समाजविज्ञान - राजनीति - वाणिज्य - उद्योग - पत्रिकोद्यम - वास्तु - कला - अर्थ - विधि - कृषि - वैद्यकीय - सङ्गणक - परिसर - विकास - प्रशासन - दूरसञ्चार - पर्यटन - रक्षण - जलसिञ्चन - औषधीय - आणविक - विद्युत् - न्याय - जालपुट - खगोल - भूगोल - पाक - क्रीडा - मनोरञ्जनादयः ये अद्यतनाः विषयाः शतशः सन्ति तेषां पुस्तकानि संस्कृतेन लेखनीयानि। तेन नवशब्दनिर्माणं भविष्यति, भाषाविकासः भविष्यति, संस्कृतं व्यवहारभाषा भविष्यति च।

५) संस्कृतमाध्यमस्य संस्कृतपाठ्यपुस्तकानि

विद्यालयेषु महाविद्यालयेषु च संस्कृतस्य संस्कृतमाध्यमेन पाठनाय बहुविधानि पाठ्यपुस्तकानि रचनीयानि। प्रतिराज्यं प्रतिविश्वविद्यालयं च पाठ्यक्रमाः भिन्नाः भवन्ति इति कारणतः पुस्तकानि अपि भिन्नानि एव लेखनीयानि भविष्यन्ति। तानि च विनूतनशैल्या स्युः, सरलानि आकर्षकाणि च स्युः। चतुर्णाम् अपि कौशलानां पाठनं कर्तुम् अनुकूलानि भवेयुः। एतदर्थं प्रतिराज्यं पृथक् एव प्रयत्नाः करणीयाः भवेयुः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आवश्यकानि। प्रशिक्षणसाहित्यम् इत्येव कश्चन महान् विषयः। संस्कृत-आचार्यप्रशिक्षणं यावत् संस्कृतेन न भवति, तावत् विद्यालयेषु संस्कृतमाध्यमं कथम् आगच्छेत्? यावत् प्रशिक्षणसाहित्यं संस्कृतेन न सम्पादितं तावत् प्रशिक्षणं संस्कृतेन कथं पूर्णतां गच्छेत्? शिक्षाशास्त्रिपाठ्यक्रमस्य प्रारम्भानन्तरं चत्वारिंशत् वर्षाणि अतीतानि, परं किं तत्सम्बन्धे चत्वारिंशत् पुस्तकानि संस्कृतेन प्रकाशितानि? किमुत वर्षे एकम्?

साहित्यस्य प्रकाराः पूर्वोक्ताः दश विधाः केवलं न, अन्ये अपि बहवः सन्ति। परन्तु प्रकृतसमयस्य आवश्यकता प्रधानतया एतेषां दशानाम्।

संस्कृतविश्वविद्यालयाः, संस्कृतपरिषद् (आकादमी इत्याख्याः,) संस्कृतप्रचारपरिषदः च दशानां नवसाहित्यप्रकाराणां सर्जनविषये चिन्तयेयुः तर्हि योग्यं स्यात्। लेखनसमर्थः प्रत्येकं संस्कृतज्ञः अपि यत्नशीलः भवेत्।

वृक्षः प्रतिवर्षं नवानि पर्णानि, पुष्पाणि, फलानि च धत्ते। तथैव संस्कृतवाङ्मयवृक्षः अपि प्रतिवर्षं पल्लवितः पुष्पितः, फलितः च स्यात्।

जीवनस्य रहस्यमेव शरीरे प्रतिक्षणं नवीनजीवकोषाणाम् उत्पत्तिः इति। संस्कृते नियतं कृतिनिर्माणम् अपि तस्य अस्तित्वरक्षकम्।

वाचकाः प्रकाशकाः इति एतादृशाः बाह्यविषयाः अस्माकं स्थितिगतिनियन्त्रकाः न भवेयुः। संस्कृतसेवा करणीया इति धर्मबुद्धिः एव अस्माकं प्रेरणामूलम्। आत्मबलं मनोबलम् एव अस्माकं बलम्। सत्ये विश्वासः एव आशा। अन्तःकरणसन्तृप्तिः एव लाभः। अप्रसिद्धिः एव कीर्तिः। कार्यसौन्दर्यम् एव स्वजीवनसौन्दर्यम्। भामत्यः एव अपत्यानि। संस्कृते नवसाहित्यनिर्माणम् ऐश्वर्यं कार्यम्। संस्कृतार्थं परिश्रमः एव पुरुषार्थः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

❖❖❖

भवितव्यम्। तदर्थं ते प्रशिक्षणीयाः। एतदर्थम् इतरभाषासु 'सक्सेस् लिटरेचर्' 'लीडरशिप् लिटरेचर्' इति बहूनि पुस्तकानि भवन्ति। भाषणकौशलं, स्मरणं, शीघ्रपठनं, प्रभाविलेखनं, जनसम्पर्ककौशलं, निर्णयकौशलं, मैत्रीसम्पादनं, गणे कार्यकरणं, कार्ययोजनाकरणं, चिन्तनरीतिः, नेतृत्वगुणाः, समयनिर्वहणम् इत्येवं प्रकारेण तत्र बहवः विषयाः भवन्ति। एतेषां विषयाणां संस्कृतेन पुस्तकरचनां कृत्वा अस्माकं प्रियसंस्कृतच्छात्रान् वयं पठनाय प्रेरयेम। तान् वयं वर्तमानशताब्दस्य नायकान् कुर्मः चेदेव संस्कृतम् अपि विश्वभाषा भवितुम् अर्हति, नो चेत् न।

९) राष्ट्रियविषयाणां पुस्तकानि

राष्ट्रस्य नवनिर्माणाय संस्कृतम् अनिवार्यम् इति वयं वदामः। परन्तु वर्तमानासु राष्ट्रियपरिचर्चासु न संस्कृतं, न वा संस्कृतज्ञाः कुत्रापि दृश्यन्ते। न वा संस्कृतज्ञानां मध्ये संस्कृतभाषया राष्ट्रियसमस्यानां परिचर्चा भवति। अतः राष्ट्रसम्बन्धी अस्माकं सः स्वप्नः बहु दूरे एव अस्ति। तथापि प्रथमसोपानरूपेण देशस्य, समाजस्य च एकैकां समस्यां स्वीकृत्य तद्विषये पुस्तकं संस्कृतेन लेखनीयं, देशस्य विकाससम्बन्धे एकैकं विषयम् अधिकृत्य पुस्तकं रचनीयं, प्रतिवर्षं राष्ट्रस्तरे याः परिचर्चाः जनसञ्चारमाध्यमेन (मीडिया द्वारा) भवन्ति तद्विषये संस्कृतेन पुस्तकानि तत्तद्वर्षे तत्तत्समये एव प्रकाशितानि भवेयुः। तेन प्रथमं वयं संस्कृतज्ञाः समकालिकाः भवेम, संस्कृतसाहित्ये समकालिकस्पन्दनं तदनन्तरं भवेत्। एतेन प्रयासेन बहुशीघ्रम् एव संस्कृतस्य चित्रं परिवर्तेत।

१०) शिक्षकप्रशिक्षणसाहित्यम्

संस्कृतशिक्षकाणां स्वयं भाषाभ्यासाय पुस्तकानि आवश्यकानि, शिक्षणविधि-शिक्षादर्शन-शिक्षण-नेतृत्व-प्रशासनादीनां शैक्षिकविषयाणां पुस्तकानि

CC-0. Nepal Sanskrit University. Digitized by eGangotri Kathmandu Collection

अनुवादविधिना मातृभाषामाध्यमेन संस्कृतविषये (न तु संस्कृतं) पठितवन्तः इति कारणतः तेषां संस्कृतप्रयोगसामर्थ्यं प्रकृतं नास्ति। यावत् ते समर्थाः न भवन्ति तावत् पाठनविधि-परीक्षाविधि-पाठ्यपुस्तकेषु यानि परिवर्तनानि इष्टानि तेषां परिवर्तनानाम् एते शिक्षकाः एव विरोधं कुर्युः। अतः शिक्षकाणां प्रशिक्षणकार्यक्रमाः व्यापकतया करणीयाः। एतदर्थं सर्वकारीय-योजनानाम् उपयोगेन सह मठमन्दिराणां, सांस्कृतिक-सामाजिक-संस्थानां सहयोगेन अभियानरूपेण प्रतिजनपदं (जिला-जिला-मध्ये) शिक्षकप्रशिक्षणशिबिराणि प्रतिवर्षम् आयोजनीयानि।

३) उपयोगिताप्रतिष्ठापनम्

सद्यः हालेण्ड्देशे महर्षि महेशयोगि-संस्थानप्रेरितः कश्चन विश्वविख्यातः मस्तिष्कतज्ञः मस्तिष्कस्य कार्यविषये संशोधनं कृतवान्। तस्य संशोधनम् एतद् आसीत् यत् इतरभाषाणां श्रवणसमये संस्कृतस्य श्रवणसमये च मस्तिष्ककोषाणां कार्ये कः भेदः इति। निष्कर्षः एषः सञ्जातः यत् इतरभाषाणाम् अपेक्षया संस्कृतभाषाश्रवणसमये अधिकमस्तिष्ककोषाः क्रियाशीलाः भवन्ति इति। संस्कृतस्य उपयोगितायाः प्रसङ्गे एतादृशाः शतशः प्रयोगाः करणीयाः।

संस्कृतस्य सङ्गणक-विज्ञान-स्वास्थ्य-नैतिकता-संस्कृति-कला-सङ्गीत-वास्तु-खगोल-गणित-इतिहास-तन्त्रज्ञान-प्रबन्धन-जीवनयशस्विता-परिसर-विश्वशान्ति-दर्शन-अर्थ-इत्यादिरूपेण बहूनां विषयाणां च यः सम्बन्धः, तेन च या उपयोगिता अस्ति तत्सम्बन्धे स्थाने स्थाने प्रत्यक्षतः किञ्चित् कार्यं कृत्वा उदाहरणानि उपस्थापयामः चेत् तदा संस्कृतं सरलतया सहजतया च सम्प्रार्थितं भवति। इदानीं वयं सम्भावनाः वदन्तः स्मः। अस्माभिः सम्भावितस्य प्रात्यक्षिकं किञ्चित् जनानां पुरतः उपस्थापनीयम्।

संस्कृतस्य एषा उपयोगिता इति भाषणानाम् अपेक्षया उपयोगितायाः अनुभवं कारयामः, तादृशान् कार्यक्रमान् स्वीकुर्मः तर्हि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

६. दश आद्यताः

करणीयानि कार्याणि यदा बहु भवन्ति तदा विद्यमानसमयशक्तिसाधनानां द्वारा अधिकतमं साधयितुं किञ्च प्राथम्यानुगुणं कार्याणां क्रमनिर्धारणं कर्तुं कार्येषु आद्यताः चिन्तयामः। संस्कृतकार्येषु अपि अस्माभिः आद्यताः चिन्तनीयाः। तदनन्तरम् आद्यानि कार्याणि एव एकाग्रतया करणीयानि, सम्भूय करणीयानि च। तदा एव लक्ष्यप्राप्तिः भविष्यति। अत्र कार्याणि चर्च्यन्ते, न तु कार्यक्रमाः। (एकैकस्मिन् अपि कार्ये उद्देशसाधनाय बहवः कार्यक्रमाः, प्रकल्पाः, योजनाः च स्युः इति सः अन्यः एव विषयः।)

१) पाठ्यपुस्तकपरिवर्तनम्

विविधराज्येषु विद्यालयस्तरे संस्कृतशिक्षणाय यानि पाठ्यपुस्तकानि सन्ति तानि अवैज्ञानिकानि, कठिनानि, अरोचकानि, अनाकर्षकाणि च सन्ति। संस्कृतमाध्यमेन संस्कृतपाठनाय अनुकूलानि न सन्ति च। संस्कृतविषये छात्रमानसे भयोत्पादकानि सन्ति। तस्मात् तानि परिवर्तनीयानि।

पाठ्यपुस्तकेषु परिवर्तनम् आनेतुं त्रीणि कार्याणि करणीयानि भवेयुः। १) विविधविधिभिः पद्धतीभिः वा पाठनस्य प्रयोगाः, पूरकसाहित्यनिर्माणं च २) शिक्षाधिकारिणां, पाठ्यपुस्तकपरिषदः अधिकारिणां, पाठ्यपुस्तकसमितेः सदस्यानां च मेलनं, विषयनिवेदनं च ३) संस्कृतशिक्षकाणां मध्ये चर्चा, अनुकूलमानसिकतानिर्माणं च इति।

प्रतिराज्यं संस्कृतशिक्षकेषु केचन सक्रियाः भवन्ति चेत्, अग्रेसराः भवन्ति चेत्, कार्यारम्भं कुर्वन्ति चेत् च अवश्यमेव परिवर्तनं साध्यम्।

२) शिक्षकप्रशिक्षणम्

हेतो विद्यमानेषु पाठशालाध्यापकेषु संस्कृतशिक्षकेषु अधिकांशाः

CC-0. Nepal Rashtriya Pustakalaya Kathmandu Collection.

५) व्यवहारभाषात्वसम्पादनम्

प्रथमं संस्कृतभाषा वाग्व्यवहारस्य भाषा आसीत्। पश्चात् सा ग्रन्थस्था अभवत्। तदनन्तरं कञ्चित्कालं यावत् (इतरभाषाभिः तुलनायां कृतायाम् अद्यतनी स्थितिः) ग्रन्थेषु केवलम् अतिष्ठत्। पुनरपि सा वाग्व्यवहारशरीरा करणीया। लिपिबद्धा सा ध्वनिसौन्दर्यवती भवेत्।

भाषापदस्य धात्वर्थः 'भाष्लृ व्यक्तायां वाचि' इति यैः अस्माभिः ज्ञायते तैः अस्माभिः सर्वप्रथमं तद्भाषापदम् अन्वर्थकं करणीयम्। तस्य सार्थक्यसम्पादनस्य अपेक्षया महत्तमं पुण्यप्रदायि कार्यम् नान्यत् किञ्चित् भवेत्। एषा एव सर्वोत्कृष्टा पदसेवा। एतेन एव पदरक्षणं, पदार्थरक्षणं, पदशास्त्ररक्षणं च।

त्रिषु स्थानेषु संस्कृतस्य व्यवहारभाषारूपेण प्रयोगः (न तु ज्ञानमात्रम्!) संस्कृतज्ञस्य मम भवतः च अधीनः अस्ति- १) मम गृहे २) मम कक्ष्यायाम् ३) मम मित्रमण्डले। इतः प्रारम्भं कुर्मः। प्रारम्भाय मुहूर्तः द्रष्टव्यः नास्ति। शुभस्य शीघ्रम्। प्रारभ्यताम् इदानीम् एव।

व्यवहारभाषात्वसम्पादनस्य कार्यस्य अन्ये अंशाः अस्माभिः सर्वत्र, सर्वदा चर्च्यन्ते इति कारणतः अत्र विस्तारभयेन न इतोऽपि वर्ण्यते।

६) नवसाहित्यनिर्माणम्

यथा भाषितभाषारूपेण संस्कृतस्य विकासः भवेत् तथा लिखितसाहित्यरूपेण अपि विकासः भवेत्। तदर्थं नवसाहित्यं, समकालिकसाहित्यं, सर्जनात्मकसाहित्यम्, अनुवादसाहित्यम्, आधुनिकसाहित्यं, जनसाहित्यं च अस्माभिः निर्मातव्यानि।

श्रवणभाषणे ध्वनिसम्बद्धे। पठनलेखने लिपिसम्बद्धे। नवसाहित्यस्य निर्माणाभावे भाषायाः चतुर्णाम् अपि कौशलानां वास्तविकं शिक्षणम् अशक्यम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृतं किञ्चित् जनान्दोलनं भवेत्। वर्तमानकाले श्री रामदेव बाबा महोदयस्य योगासनवर्गाः किमर्थं प्रसिद्धाः जाताः? सः प्रत्यक्षतया योगासनेन स्वास्थ्यस्य सुखस्य च अनुभवं कारयति, अतः।

४) सङ्घटननिर्माणम्

वस्तुतः दशसु आद्यतासु अपि सङ्घटननिर्माणम् इति एतत् प्रथमतः एव भवेत्। परम् अत्र दशसु अपि पुनः आद्यताक्रमः कोऽपि न चिन्तितः इति कारणतः प्रथमतया न लिखितम्। परं महत्त्वं तावद् अस्ति। यतः सङ्घटनशक्तिं विना संस्कृतोज्जीवनकार्यम् असाध्यम्। करणीयानां कार्याणां सङ्ख्यां, विशालतां, महत्तां, कठिनतां च पश्यामः चेत् कियतां जनानां जीवनबलिदानस्य, यौवनसमर्पणस्य, सुखाहुतेः च आवश्यकता भवेत् इति ऊहितुं न शक्यते।

संस्कृतभारती इति नाम्ना सङ्घटननिर्माणकार्यम् आरब्धम् अस्ति। संस्कृतहिताय अत्र सर्वैः सम्मिलितैः भवितव्यम्। कार्यं करणीयं च। सङ्घटननिर्माणाय एव कतिचन कार्याणि करणीयानि भवन्ति-यथा मिलित्वा चिन्तनाय नियतम् उपवेशनं, योजनापूर्वकं दशभिः सह मिलित्वा कार्यकरणं, परस्परं स्नेहसम्बन्धस्थापनं, प्रशिक्षणवर्गः, विशिष्टया पद्धत्या कार्यकरणं, सङ्घटनरचनानिर्माणम् इत्यादि।

सङ्घटनकार्येण सह सम्बद्धः भवामि चेत् मम कापि वैयक्तिकी हानिः भविष्यति इति न चिन्तनीयम्। हानिः भविष्यति चेत् भविष्यति, तेन किम्? अत्रैव मम भवतः च संस्कृतप्रीतिः परीक्षिता भवति! संस्कृतार्थं वयं कियतीः हानीः सोढुं सिद्धाः इति तस्याः प्रमाणस्य अनुपातेन संस्कृतविकासः भविष्यति। यदि अस्माकं व्यक्तिमत्त्वम् अन्तःसत्त्वं च धर्माधिष्ठितं तर्हि अन्यचिन्तनानि विना, बाह्यपरिस्थितीः अविगणय्य च सङ्घटनकार्ये स्वं योजयेम।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न तु प्रमाणपत्राय। तत्र पारम्परिकम् अनौपचारिकं च शिक्षणम् अधिकतया भवति।

निष्कारणं शास्त्राणि अध्येतव्यानि इति हेतोः एव ये शास्त्राणि अधीयीरन् ते एव स्वाधीनशास्त्राः भवितुम् अर्हन्ति, ते एव शास्त्रसंरक्षणं कुर्युः। अतः तादृशानां परम्परा वर्धनीया। तदर्थं युवानः प्रेरणीयाः। अस्माभिः ऊहामपि कर्तुं न शक्यते इति तावता वेगेन वैदुष्यपरम्परा ह्रीयमाणा अस्ति इति कारणतः तस्याः रक्षणविषये आद्यतया कार्यं करणीयम्।

९) संस्कृतच्छात्राणां प्रशिक्षणम्

शास्त्रि-आचार्य-बि.ए.-एम्.ए.-कक्ष्यासु देशे उपपञ्चाशत् सहस्रं छात्राः संस्कृतं पठन्ति। एते न केवलं श्वस्तनसंस्कृतशिक्षकाः अपि तु अद्यतनसंस्कृतसंरक्षकाः। एतेषां संस्कृतसम्भाषणप्रशिक्षणेन तेषाम् आत्मविश्वासः, मनोबलं च अनूह्यप्रमाणेन संवर्धेत। एतेषां नायकत्वप्रशिक्षणेन ते संस्कृतसन्देशं दशदिक्षु शतक्षेत्रेषु सप्तभूखण्डेषु च नयेयुः। एतेषां भाषाभिव्यक्तिकौशलप्रशिक्षणेन, तथा च व्याकरणस्य, लेखनस्य च प्रशिक्षणेन च ते संस्कृतविकासं हिमालयोत्तुङ्गं प्रापयेयुः। अतः देशे सर्वत्र प्रतिविरामं, प्रतिवर्षारम्भं च च्छात्रप्रशिक्षणकार्यक्रमाः स्वीकरणीयाः।

१०) भविष्यतः कृते सज्जताकरणम्

दशविंशतिवर्षाणाम् अनन्तरं भारतस्य आवश्यकताः काः भवेयुः, जगतः आवश्यकताः काः भवेयुः इति चिन्तनं कृत्वा तदर्थम् अद्य संस्कृतज्ञैः अस्माभिः सज्जता करणीया। तदा एव तस्मिन् काले परिस्थितिः अस्मदधीना भवेत्, नो चेत् वयं परिस्थित्यधीनाः भवेम, यथा इदानीं स्मः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सम्भाषणान्दोलनस्य गतिरक्षणाय, नवशिक्षितानां भाषाशुद्धतायां भाषाविकासे वा नवसाहित्येन पोषकपात्रं निरूह्यते। नवसाहित्यस्य अभावे भाषास्तरदृष्ट्या जनान् अग्रे नेतुं न शक्नुयाम। तस्मात् एतत् कार्यम् आद्यतया करणीयम्।

७) जनमानसपरिवर्तनम्

संस्कृतं कठिनं, निर्जीवं, वर्गीयं च इति ये संस्कृतविषयकाः भावाः जनमानसे सन्ति तेषां परिवर्तनं यावत् न भवति तावत् जनाः संस्कृताध्ययने स्वयम् अपि प्रवृत्ताः न भवन्ति, अन्यान् अपि न प्रेरयेयुः, न वा संस्कृतशिक्षणाय व्यवस्थां कुर्युः, न वा संस्कृतपरतया किमपि महत्त्वभूतं कार्यं कुर्युः। संस्कृतसम्बन्धे शतकोटिजनात्मकस्य महतः एतस्य देशस्य मानसपरिवर्तनकार्यम् एकैकस्य जनस्य मनसः परिवर्तनेन एव भवेत्। प्रतिजनं सरलसंस्कृतभाषा श्रावणीया। तदा एव सः सरलताम् अनुभवति।

सम्पूर्णे देशे लक्षाधिकसङ्ख्यया सम्भाषणशिबिराणि चालयिष्यन्ते चेत् देशः नूनं संस्कृतम् अङ्गीकुर्यात्।

समाजे ये विचारनायकाः भवन्ति (शिक्षण-उद्योग-वाणिज्य-प्रशासन-पत्रकारिता-तन्त्रज्ञान-साहित्य-न्याय-धार्मिक-जाति-राजनीति-इत्यादि-क्षेत्राणां प्रमुखाः) तेषां मनसः परिवर्तनाय अस्माभिः योजनापूर्वकं कार्यं करणीयम्। तेषां मेलनं, तैः सह संस्कृतेन वार्तालापः, सम्भाषणशिबिरं प्रति तान् आनीय तेभ्यः सरलसंस्कृतस्य प्रदर्शनम् इत्यादिकार्याणि प्राथम्येन करणीयानि। राष्ट्रस्य नीतिनिर्णायकाः ते एव भवन्ति।

८) शास्त्रशिक्षणम्

शास्त्रम् इति पदेन यद्यपि दर्शनशास्त्राणाम् एव सामान्यतया परिगणना भवति तथाऽपि अत्र तु शास्त्रशब्दवाच्यानां सर्वेषाम् अपि शास्त्राणाम् अर्थः गृहीतः। शास्त्राध्ययनं तु ज्ञानाय, व्युत्पत्त्यै च क्रियते,

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

७. दश निर्णायकबिन्दवः

विंशतेः वर्षाणाम् अनन्तरं संस्कृतस्य का स्थितिः भवेत्, संस्कृतस्य प्रचुरः प्रचारः कदा भवेत् इत्यादयः ये प्रश्नाः उद्भवन्ति तेषाम् उत्तरम् अधोनिर्दिष्टाः ये दश बिन्दवः सन्ति तान् अवलम्ब्य अस्ति। अतः एते दश बिन्दवः अत्यन्तं महत्त्वभूताः, निर्णायकाः च।

१) दूरगामिदृष्टिः

संस्कृतज्ञाः वयं भाविनि काले करणीयकार्यसम्बन्धे अद्य कियद् दूरपर्यन्तं द्रष्टुं शक्नुमः, तदर्थम् अद्य काः सज्जताः कुर्मः इति एषा एव दूरगामिदृष्टिः इति कथ्यते। कस्य करणेन किं भविष्यति, कस्य अकरणेन च किं भविष्यति इति परिणामं चिन्तयितुं शक्नुमः चेत् वयं परिणामदर्शिनः भवामः। संस्कृतस्य विकासाय आगामिषु दशसु विंशत्यां च वर्षेषु किं किं करणीयं, लक्ष्यं, मार्गः, कार्यक्रमाः च के, इति एतेषां स्पष्टचित्रम् एव सा अपेक्षिता दृष्टिः। किं संस्कृतज्ञानां मध्ये एतद्विषये चर्चा भवति? विविधेषु संस्कृतमञ्चेषु एतद्विषये गभीरं विचारमथनं भवेत्।

२) सुचिन्तितकार्ययोजना

दूरस्थं लक्ष्यं साधयितुं काचित् सुस्पष्टा, समयबद्धा च कार्ययोजना आवश्यकी। कार्ययोजनायां १) लक्ष्यं, २) समस्याविरणं, ३) परिहारमार्गः, ४) प्रस्तावितकार्यक्रमाः, ५) अपेक्षितानि साधनानि, ६) समयानुसारं कार्यविभागः, ७) व्यक्त्यनुसारम् उत्तरदायित्वनिश्चयः अथवा उत्तरदायित्वानुसारं व्यक्तिनिश्चयः, ८) कार्यनिरीक्षणव्यवस्था, ९) व्यत्ययेषु पर्यायाः, १०) कार्य-व्यक्ति-समय-निर्देशिका इति दश अंशाः भवन्ति। न केवलं वाणिज्ये, उद्योगे च एतादृशी योजना सज्जीक्रियते, अपि तु जगति सर्वेषु विकासकार्येषु अपि एतादृशी विस्तृता कार्ययोजना सज्जीक्रियते। सा परिणामकेन्द्रिता कार्ययोजना एव सफलतायाः मूलम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृतं विश्वभाषा इति वयं भाषणेषु वदामः। (स्वस्य गृहभाषा नास्ति, विद्यालयकक्ष्याभाषा नास्ति इति तु अन्यः विषयः।) श्वः, परश्वः, प्रपरश्वः वा तां विश्वभाषां कर्तुम् अद्य अस्माकं काचित् कार्ययोजना स्यात्। तस्यां दिशि एकं पदं वा निक्षेप्तव्यम्।

संस्कृतक्षेत्रे कर्तृत्वसम्पन्नाः, ज्ञानिनः, विशुद्धचरित्राः, समर्पिताः, पुरुषार्थसाधकाः च युवकार्यकर्तारः अस्माभिः प्रतिष्ठापनीयाः। तेषां प्रचण्डसामर्थ्यवतां व्युत्पन्नसंस्कृतकार्यकर्तृणां स्वेदकणैः जीवनेष्टिकाभिः च संस्कृतस्य भविष्यतः भवनं सुदृढं भवेत्।

उपरि निर्दिष्टप्रकारेण अस्माकम् आद्यताः याः सन्ति तासां परिकल्पना सर्वस्य अपि संस्कृतज्ञस्य स्पष्टतया भवेत्। अतः एतद्विषये प्रतिविद्यापीठं चर्चा-गोष्ठी आयोजनीया। दिशः स्पष्टतायाः अभावे पुरोगतिः न भवति।

दशसु आद्यतासु एकैका अपि एतादृशी अस्ति यत् एकैकस्मै अपि कार्याय एकैकः तत् स्वस्य जीवनकार्यम् इति स्वीकृत्य तदर्थम् आजीवनं तपस्यां कर्तुं शक्नोति इति। एवं केचन जीवनव्रतरूपेण यदा कार्यं कुर्युः तदा एव संस्कृतस्य संवर्धनं भवेत्।

स्वस्य उदरपूर्तेः अनन्तरम् अवशिष्टम् अन्नम् अन्यस्मै ददाति चेत् तद् दानकार्यं, 'त्यागः' इति वक्तुं न शक्यते। स्वयं बुभुक्षितः तिष्ठेत् चेद् अपि स्वस्य भोजनम् अथवा भोजनस्य भागम् अन्यस्मै ददाति चेत् सः त्यागः भवति। एतादृशैः त्यागैः केवलं, समय-शक्ति-धन-प्रतिभा-समर्पणैः केवलं संस्कृतोन्नतिः साध्या।

संस्कृतप्रचारयज्ञे आहुतयः दातव्याः सन्ति। मौनतया तत्र स्वजीवनम् अपि समिधं कुर्मः चेत्?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

६) सङ्घटनवृद्धिः

करणीयानि सर्वाणि अपि कार्याणि सङ्घटनस्य माध्यमेन एव करणीयानि भविष्यन्ति। अतः संस्कृतभारतीनाम्ना अस्माकं सङ्घटनं कियत् शीघ्रं वर्धते, कियत् सुदृढं वर्धते, कियत् व्याप्तं भवति, कियत् शक्तिशालि भवति, कार्यस्थानसङ्ख्या, कार्यकर्तृसङ्ख्या, कार्यसङ्ख्या, तासां वृद्धिः इत्यादीन् अंशान् अवलम्ब्य संस्कृतं स्थास्यति।

७) शैक्षिकगतिविधयः

यद्यपि वयं न केवलं शिक्षाक्षेत्रे, अपि तु राष्ट्रजीवनस्य सर्वक्षेत्रेषु संस्कृतम् आनेतुम् इच्छामः तथापि अद्य तु प्रधानतया शिक्षाक्षेत्रे केवलं संस्कृतम् अस्ति। शिक्षाक्षेत्रम् एव अस्माकं प्रधानम् अवलम्बनम्। अतः संस्कृतस्य शैक्षिकगतिविधयः केवलं संस्कृते बह्वपेक्षितं चैतन्यसञ्चारं कारयितुं शक्नुयुः, राकेट् इत्यस्य प्रक्षेपणाय अपेक्षितम् आरम्भवेगं (नोदनं वा) दातुं शक्नुयुः। शतमीटर्धावनप्रतियोगितायां प्रस्थानक्षणस्य प्रारम्भवेगः अपि निर्णायकः भवति। मूलस्रोतः तु अजस्रम् अकिल्बिषं च भवेत्। संस्कृतक्षेत्रस्य कृते अपेक्षितायाः विद्युतः विद्युदुत्पादनकेन्द्रं तु शिक्षाक्षेत्रम्। शैक्षिकगतिविधयः एव विद्युज्जनकानि।

८) यूनां स्वप्नाः

कस्य समाजस्य भविष्यम् उज्ज्वलम् अस्ति इति पृष्टे सति कश्चन ज्येष्ठः उक्तवान् यस्य समाजस्य युवकानां नेत्रयोः पुरतः स्वप्नाः सन्ति तस्य समाजस्य भविष्यम् उज्ज्वलम् इति। तथा संस्कृतजगति ये युवानः सन्ति, छात्राः सन्ति ते नवान् स्वप्नान् संस्कृतविकासकान्, राष्ट्रोद्धारकान् द्रष्टुं प्रेरणीयाः। तेषु आकाङ्क्षाः, महत्त्वाकाङ्क्षाः एव, उत्पादनीयाः। व्यक्तिगता महत्त्वाकाङ्क्षा न, अपि तु संस्कृतगतमहत्त्वाकाङ्क्षा। समर्थरामदासः यदा बालः आसीत् तदा सः कस्मिंश्चित् प्रकोष्ठे उपविश्य दीर्घकालं यावत् [illegible] तदा कश्चन तं पृष्टवान् तत्र किं करोति

CC-0. Nepal Sanskrit University. Anusandhan Kendra Academy, Kathmandu Collection

३) सामूहिकसक्रियता

संस्कृतज्ञानाम् अस्माकं विद्यालयस्य महाविद्यालयस्य च कार्यसमयं, भवनसीमां च विहाय समाजे संस्कृतप्रचारकार्येषु या सक्रियता अपेक्षिता, तत्र अपि सर्वैः सह मिलित्वा कार्यकरणस्य सामूहिकसक्रियता या आवश्यकी सा एव नितान्तं निर्णायिका। सामाजिक-जागतिक-परिस्थितयः प्रगतयः च, सर्वकारनीतयः, भगवतः इच्छा इति एतानि त्रीणि कारणानि संस्कृतम् उद्धरेयुः इति चिन्तयन्तः यदि वयं कार्यहीनाः जडाः तिष्ठामः तर्हि संस्कृतविकासः तु सर्वथा नैव भवेत्, वयं केवलं 'भुविभारभूताः' चरेम! संस्कृतोत्थानाय, राष्ट्रोत्थानाय, सांस्कृतिक-नवोत्थानाय च संस्कृतज्ञानाम् अस्माकं सामूहिकसक्रियता अनिवार्या। सा एव कार्यशरीरस्य प्राणाः।

४) परिवर्तनक्षमता

अस्मान् परितः बहुविधानि परिवर्तनानि जायमानानि एव भवन्ति। तेभ्यः परिवर्तनेभ्यः समये समये संस्कृतज्ञानाम् अस्माकं प्रतिस्पन्दनं कीदृशं, वयम् अस्मासु अपेक्षितपरिवर्तनेभ्यः कियता मात्रेण, केन प्रकारेण वा स्वागतं कुर्मः, तेभ्यः परिवर्तनेभ्यः कियान् कालः स्वीक्रियते, वेगेन परिवर्तनस्य क्षमता अस्ति उत न, परिवर्तनम् इच्छामः उत न इति एतदनुगुणं संस्कृतस्य भविष्यं रूपितं भविष्यति।

५) गुणस्तरवर्धनप्रयत्नाः

शिक्षकाणां गुणस्तरः, पाठनविधेः गुणस्तरः, पाठ्यपुस्तकानां गुणस्तरः, विद्यालय-महाविद्यालयानां गुणस्तरः, प्रकाशनानां गुणस्तरः, कार्यक्रमाणां गुणस्तरः, कार्यकर्तॄणां गुणस्तरः, प्रयुज्यमानायाः भाषायाः गुणस्तरः, आहत्य संस्कृतज्ञानां गुणस्तरः, अस्माकं चिन्तनगुणस्तरः इत्येवं प्रकारेण एतेषां सर्वेषां गुणस्तरवर्धनाय अस्माकं ये प्रयत्नाः भाविनि काले भवेयुः तान् प्रयत्नान् अवलम्ब्य संस्कृतस्य उन्नतिः भविष्यति।

CC-0. Nepal Sanskrit Academy, Kathmandu. Digitized by eGangotri

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति। सः उत्तरम् उक्तवान्- 'चिन्ता करितो विश्वाची' (अहं विश्वस्य चिन्तां करोमि) इति। तथा अस्मदीयाः अपि, वैश्विकम् एव चिन्तनं कुर्युः, हिमालयोन्नतम् एंव स्वप्नं पश्येयुः, इतरैः अनाक्रान्तम् एव मार्गं क्रान्तुम् उत्सहेरन्।

९) उत्तरदानम्

समाजस्य वर्तमानसमस्यानां परिहारे संस्कृतम् अपि उपकरोति चेत्, तदा समाजेन संस्कृतं बाहुद्वयेन आलिङ्गितं भविष्यति। अतः अद्यतनप्रश्नानाम् उत्तरदानस्य महत्तमं कार्यम् अस्माभिः चिन्तनीयम्।

१०) राष्ट्रभावसंवर्धनम्

राष्ट्रियविचारवादिनः नीतिनिर्णायकस्थानेषु यदा भवन्ति तदा एव संस्कृतपरनिर्णयाः स्वीकृताः भवेयुः। अराष्ट्रियविचारवन्तः संस्कृतस्य प्रोत्साहनं कथं वा कुर्युः? अतः यदि वयं संस्कृतं शीघ्रमेव प्रतिष्ठापयितुम् इच्छामः तर्हि अस्माभिः राष्ट्रभावसंवर्धनकार्येषु अधिकाधिकः सहयोगः करणीयः।

नास्ति पुण्यमयुक्तस्य राष्ट्रे संस्कृतिसेवने।
नास्ति पापं सुयुक्तस्य कार्ये संस्कृतसेवने।।
विनोद्देशं विना तृप्तिं जीवनं ननु याप्यते।
कुतो वा सेवया वाचः सार्थक्यं नैव साध्यते।।
निष्क्रियः सक्रियो भूत्वा सोद्यमः संस्कृतो भवेत्।
भारतीं भाषितां कृत्वा जीवने सफलो भवेत्।।
कर्तव्येषु च सर्वेषु महत्सु शिवकारिषु।
आद्यं हृद्यं समासाद्यं संस्कृतोज्जीवनं त्रिषु।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection



एतस्य लेखकस्य कृतयः -

१. सङ्क्रमणम्

२. ज्ञाने धर्मः उत प्रयोगे?

३. संस्कृतम् - स्वाट् असेस्मेण्ट्

४. परिवर्तनम्

५. संस्कृतभारती

६. उत्तिष्ठ! मा स्वप्त!!

७. सप्तदशी

८. निमित्तमात्रम्

९. परिष्कारः

मूल्यम् - ₹ ३०/-

ISBN 818727626-6

CC-0. Nepal Sanskrit Academy, Kathmandu Collection